५

५

अं॰ नं॰ - ३२ अथ अलंकारशेखरः प्रारभ्यते पत्रे॰ - ३९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ० शे० श्रीगणेशायनमः॥ प्राणंकृशोदरीणांराधानयनान्तसर्वस्वम् तेजस्तमालनीलंशरणागतवज्रपञ्जरम्वन्दे॥१॥स्वप्रकाशचिदानंद
१ मयायपरमात्मने अविद्यानिविडध्वान्तभास्करायनमोन्वहम्॥२॥ग्रन्थाःकाव्यकृतांहितायविहितायेसन्नपूर्वैर्मयातेतर्क्कार्णवसं
प्लवव्यसनिभिःशक्याःपरंवेदितुम् इत्यालोच्यहृदामदालसवधूपादारविन्दक्वणन्मञ्जीरध्वनिमञ्जुलोपमधुनाप्रस्तूयतेप्रक्र
मः॥३॥आसीत्प्रत्यर्थिपृथ्वीरमणकमलिनीवृन्दहेमन्तमासः कीर्तिभ्राजत्सुशर्मान्वयकुमुदवनीयामिनीजीवनाथः राजद्राजन्यरा
जीमुकुटमणिगणप्रोल्लसत्पादपीठःप्रोद्यत्साम्राज्यलक्ष्मीशिथिलितनहुषोरामचन्द्रोवनीन्द्रः॥४॥मित्राणिप्रतिपालयंस्त्रिजगतीं
कीर्तीन्दुनाह्लादयन् शत्रूणांहृदयंप्रतापदहनैरान्त्रिंदिवंज्वालयन् सर्वस्वेनकृतार्थयन्द्विजगणान्देवान्मखैस्तोषयन्नेषप्रौढमनाश्चि
रायवुभुजेसप्तार्णवांमेदिनीम्॥५॥सूत्रामोद्दामदिल्लीपरिवृढविलसत्काविलक्षोणिभर्त्रोः प्रक्रान्तेप्रौढयुद्धेसमदलयदसौकोटिशो
वैरिवीरान् पश्चान्मांसास्थिमेदःकलुषितवसुधांप्रोभयतांश्चाकलय्यद्यांयातान्वैरिवर्गान्दिवमपिसहसाजेतुकामोजगाम॥६॥क्षीरा
म्भोधेःशशीवश्रुतिरिववदनाद्वेधसोरामचन्द्रादस्मादुद्यत्प्रतापःसमजनिसुमनाधर्मचन्द्रोनरेन्द्रः यस्याद्यापिप्रसन्नस्मितसुभग

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मुखाः खिद्यदञ्चत्कपोलारोमाञ्चस्तंभभव्यास्त्रिदशयुवतयोहन्तगायन्तिकीर्त्तीः॥७॥निःक्रान्तंसदनादुदेसिभगवानम्भोजिनीवल्ल
भस्तेवाताः परिशीलिताः कमलिनीसौरभ्यमेदस्विनः विभ्रान्तंगिरिकाननेषुनिविडच्छायेषुभाग्योदयादित्यंस्मेरमुखाः स्तुवन्तिविप
दंयदैरिवामभुवः॥८॥ प्रत्यर्थिभूपतिपरिग्रहराज्यलक्ष्मीधम्मिल्लमाल्यसुरभीकृतपाणिपद्मः तस्मादजायतसमस्तगुणाभिरामोमा
णिक्यचन्द्रइतिराजकचक्रशक्रः॥९॥काव्यालंकारपारंगममतिरखिलक्ष्माभृतांचक्रवर्तीसर्वेषामस्तुकामेमतिरतिनिपुणेत्याशयेसन्नि
वेश्य वेदान्तन्यायविद्यापरिचयचतुरंकेशवंसन्नियुज्यश्रीमन्माणिक्यचन्द्रः क्षितिपतितिलकोग्रंथमेनंविधत्ते॥१०॥बहुदोषोपि
विदोषः क्रियतेसुजनेनवाणइवहरिणा गुणवदपिनिर्गुणीयतिदुर्जनतोमूषिकातइवपुस्तम्॥११परोद्वेगेपरानन्देखलसज्जन
योर्द्वयोः स्वभावएवशरणम्विषपीयूषयोरिव॥१२॥अलंकारविद्यासूत्रकारोभगवान्शौद्धोदनिः परमकारुणिकःस्वशास्त्रेप्रवर्त्त
यिष्यन्प्रथमंकाव्यस्वरूपमाह॥ काव्यंरसादिमद्वाक्यंश्रुतंसुखविशेषकृत् आदिपदेनालंकारपरिग्रहः॥तथाच॥तदुभयान्यतर
वत्वंवालक्षणम् अन्यतरवत्त्वंचतदन्यान्यत्वम् सुखविशेषसाधनंवालक्षणम् समुदायार्थशून्येपितदुभयमस्त्येवेतिरुद्धाःअद्द

CC-0. Lal Bahadur Shastri ... Delhi. Digitized by Sarvagya Sharada Peetham

ष्टद्वारा तद्धेतु शब्दे ऽतिव्याप्तेराह श्रुतमिति सहृदिति शेषः सुखे वैजात्यं सर्वानुभवसिद्धमेव ॥ केचित्तु ॥ तददोषौ शब्दार्थौ सगुणावन
लंकृती पुनः क्वापीत्याहुः रसप्रतिपत्तिगुणद्वारासुखविशेषसाधनं काव्यमित्यपरे केचित्तु पदावली काव्यम् न तु निर्दोषगुणवदा
दिकाव्यदोषाणामपरिगणनापत्तेः न च दोषाभावघटितकाव्यत्वज्ञानार्थमेव प्रतियोगिपरिगणनमिति वाच्यम् तथैतत्काव्यं दुष्ट
मित्यनुद्भावनापत्तेः इदं काव्यमेव नेत्यभिधानस्यैवौचितत्वादित्याहुः तन्न तथायं हेतुराभास इतिवदुपपत्तेः व्याप्तिविशिष्टपक्षध
र्मस्यैव हेतुत्वात् न च हेतुत्वेनाभिमत इति वाच्यम् तुल्यत्वादिति वस्तुतस्तु काव्यं पृथगेव यत्र दोषे गुणादिचिन्ता न हि दुष्टं शरीरं शरीर
मेव न भवतीत्यन्ये कीर्त्यादिरूपफलसाधनता तु विशिष्टस्य ॥ यदाह ॥ साधुशब्दार्थसन्दर्भं गुणालंकारभूषितं स्फुटरीतिरसोपेतं का
व्यं कुर्वीत कीर्तये ॥ आहुश्च ॥ निर्दोषं गुणवत्काव्यमलंकारैरलङ्कृतम् रसान्वितं कविः कुर्वन्प्रीतिं कीर्तिं च विंदति प्रवृत्त्यौपयिकं फल
माह हिताय सुकविः कुर्यात् सुकवेरेव हितमन्यस्य तु प्रतिकूलमिति तन्न ॥ तदुक्तं च ॥ गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते
बुधैः दुःप्रयुक्ताः पुनर्गोत्वं प्रयोक्तुः सैव संशति श्लाघ्यः पामरपरिषदि कवयति दोलीककर्त्तापि यस्मै स्पृहयति विद्वांस्तत्का

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ंकाव्यमित्याहुः अर्थैः कृतार्थयंत्येके घटनापटवः परे उभयत्र प्रवीणा ये त एव कवयो मताः॥ हितमाह श्रीपादः॥ लाभः पूजा ख्यातिर्द्धर्मः कामश्च मोक्षश्च इष्टानिष्टप्राप्तिपरित्यागौ ज्ञानं फलानि काव्यस्य दृष्टेति गोवृषन्यायात्॥ आहुश्च॥ काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे॥ रुद्रास्तु॥ श्रोतॄणां द्राग्महानंदः सः स्वस्मिन्नाभिमानिकः तत्कालफलमेतावत्क्रमात्कीर्तिधनादिकं नन्वेवं सर्वः सुकविरेव स्यात् अत आह तद्धेतुः प्रतिभादिकम्॥ तदाह॥ प्रतिभाकारणं तस्य व्युत्पत्तिस्तु विभूषणम् भृशोत्पत्तिकृदभ्यासः काव्यस्यैषा व्यवस्थितिः व्युत्पत्तिर्नानातंत्रज्ञानम्॥ आहुश्च॥ शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे शक्तिः पुण्यविशेषः स एव प्रतिभेत्युच्यते व्युत्पत्तिः शक्तिरभ्यासस्त्रितयं काव्यसाधनमित्यपि॥ श्रीपादस्तु॥ परिशीलितकाव्यवर्त्मनां कविसंसर्गविशुद्धचेतसां परिभावयतामनुक्षणं कविता पाणितले निषीदति नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम् अमन्दश्चाभियोगोऽस्याः कारणं काव्यसंपदः मनः प्रसत्तिः प्रतिभा प्रातःकालेऽभियोगिता अनेकशास्त्रदर्शित्वमित्यर्थालोकहेतवः द्वित्रिकोषपरिज्ञानं द्वित्रिव्याकर

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णज्ञता छन्दोविद्याप्रवीणत्वंकाव्येवश्यमपेक्षते आदिपदात्प्रकारपरिज्ञानम् तथाहिसाखल्वेषाभारतीसुरसरिदिवसहस्रमु
ख्यपिसंक्षेपेणचतुर्द्धाप्रवर्तते तदाहुः संस्कृतंप्राकृतंचैवपैशाचीमागधीतथा विद्याश्चतस्रएवैताः संक्षेपात्काव्यवर्त्मनः दे
वाद्याः संस्कृतंप्राहुः प्राकृतंकिन्नरादयः पैशाचींचपिशाचाद्यामागधींहीनजातयः चतस्रष्वपिमूर्द्धन्यंसंस्कृतंमुनयोविदुः गद्यं
पद्यंचमिश्रंचतन्त्रिधैवव्यवस्थितम् गद्यमुत्कलिकाप्रायंपद्यगंधीतिचद्विधा तत्रापिपद्यंतदपिवृत्तकंवर्णमात्रयोः समवैषम्य
भेदेनतदानंत्यायकल्पते दण्डिनस्तु ॥ तदेतद्वाङ्मयंभूयः संस्कृतंप्राकृतंतथा अपभ्रंशश्चमिश्रंचेत्याहुरार्याश्चतुर्विधम् प्राकृ
तंतज्जतत्तुल्यदेश्यादिकमनेकधा अपभ्रंशश्चयच्छुद्धंतत्तद्देशेषुभाषितम् संस्कृतंसर्गबंधादिप्राकृतंस्कन्धकादिकम् आसा
रादित्वपभ्रंशोनाटकादितुमिश्रकम् यथामतियथाशक्तियथौचित्यंयथारति कवेःपात्रस्यचैतासांप्रयोगउपपद्यते ॥ इत्यलंकारशे
खरेउपक्रमरत्नेकाव्यस्वरूपफलकारणमरीचिः ॥ शरीरिकल्पस्यकाव्यस्यरूपान्तरमाह ॥ रीतिरुक्तिस्तथामुद्रावृत्तिः काव्यस्य
जीवितम् त्रिविधस्यापिदोषास्तुत्याज्याः श्लाघ्याहृद्येगुणाः अलङ्कारस्तुशोभायैरसआत्मापरेमनः इत्यइतिशब्दार्थभेदान्वितयान्वयि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

परेरसदोषाभावानुकूलवर्णाद्यः तत्र तत्तद्रसोपकारिण्यस्तत्तद्देशसमुद्भवाः पद्येषुरीतयोगौडीवैदर्भीमागधीतथा तदेतत्पल्लवय
न्ति॥श्रीपादाः॥गौडीसमासभूयस्त्वाद्वैदर्भीचतदल्पतः अनयोः सङ्करोयस्तुमागधीसातिविस्तरा गौडीयैः प्रथमामध्यावैदर्भैर्मैथि
लैस्तथा अन्यैस्तुचरमारीतिः स्वभावादेवसेव्यते॥तत्रगौडीयथा॥उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाक
लीकलकलैरुद्गीर्णकर्णज्वराः नीयंतेपथिकैः कथंकथमपिध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमीवासराः॥वैद
र्भीयथा॥मनीषिताः सन्तिगृहेषुदेवतास्तपः क्ववत्सेक्कचतावकंवपुः पदंसहेतभ्रमरस्यपेलवंशिरीषपुष्पंन पुनः पतत्रिणः॥मा
गधीयथा॥पाणौपद्मधिया मधूककुसुमभ्रान्त्यापुनर्गण्डयोर्नीलेन्दीवरशङ्कयानयनयोर्बन्धूकबुध्याधरे लीयन्तेकवरीषुबान्धवजन
व्यामोहजातस्पृहादुर्वारामधुपाःकियन्तितरुणिस्थानानिरक्षिष्यसि इयंचबहुधाविस्तृतमन्यत्र॥भोजराजस्तु॥शस्ताविदग्धगोष्ठीषुवै
दर्भीरीतिरुत्तमा मागधीमध्यमागौडी गौडस्त्रीकलहायते॥यदाह॥ब्रह्मन्विज्ञापयामित्वांस्वाधिकारजिहासया॥गौडस्त्यजतुवागा
थामन्यावास्तुसरस्वती॥उक्तिंविभजते॥लोकच्छेकार्भकोन्मतभेदादुक्तिश्चतुर्विधा॥ तत्रलोकोक्ति॥शापान्तोमेभुजगशयनादुत्थि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेशार्ङ्गपाणौशेषान्मासान्गमयचतुरोलोचनेमीलयित्वा पश्चादावांविरहगुणितं तमात्माभिलाषं निर्वेक्ष्यावः परिणतशरच्चन्द्रि
कासुक्षपासु॥ छेकोविदग्धस्तस्योक्तिर्यथा॥योतिदीर्घासिताक्षस्यविलासचलितभ्रुवः कान्तामुखस्यावशगस्तस्मैनृपशवेनमः
॥अत्रनृपशवइति॥ अर्भकोक्तिर्यथा॥ सकिंस्वर्गतरुःकोपियस्यपुष्पंनिशाकरः मातःस्तेकीदृशावृक्षायेषांमुक्ताफलंफल
म् अत्रपुष्पंनिशाकरः फलंमुक्ताफलमिति॥उन्मत्तोक्तिर्यथा॥ क्वाकार्यंशशलक्ष्मणः क्वचकुलंभूयोपिदृश्येतसादोषाणांप्रशमाय
नः श्रुतमहोकोपेपिकान्तंमुखम् किंवक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेपिसादुर्लभाचेतः स्वास्थ्यमुपैहिकः खलुयुवाधन्योधरंधास्य
ति अत्रविरहोन्मत्तस्यै वमभिधानं विन्यासविशेषवशाद्यत्राभिप्रायविशेषलाभेनमुदोहर्षस्योत्पत्तिः सामुद्रा॥तामिदानींविभजते
मुद्रापदस्यवाक्यस्यविभक्तेर्वचनस्यच॥तत्रपदमुद्रायथा॥ निर्माल्यंनयनश्रियः कुवलयंवक्त्रस्यदासः शशीभ्रूयुग्मस्यसनाभिम
न्मथधनुर्ज्योत्स्नास्मितस्याचलम् संगीतस्यचमत्तकोकिलरुतान्युच्छिष्टमेणीदृशः सर्वाकारमहोविधेः परिणतंविज्ञानशिल्पंचिरा
त् अत्रनिर्माल्यादिपदानांगौणवृत्त्याऽभिप्रायविशेषान्मुद्राप्रदायिता॥वाक्यमुद्रायथा॥ रामेतटान्तवसतौकुशतल्पशायिन्यद्यापिना

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ एवझटितिचमत्कारविशेषमारोहति वाच्यनिरूपितव्यंग्यप्रकर्षानाधारत्वंमध्यमत्वम्॥यथा॥ग्रामतरुणंतरुण्यानववञ्जुलमंजरी
६ सनाथकरंपश्यन्त्याभवतिमुहुर्नितरांमलिनामुखच्छाया अत्रवञ्जुलकुञ्जेदत्तसंकेतातरुणीनगतेतिव्यज्यते तच्चगुणीभूतंतदपेक्षया
वाच्यस्यैवचमत्कारित्वात् चमत्कृतिहेतुव्यंग्यरहितत्वमधमत्वम्॥यथा॥वन्दामहेमहेशानचण्डकोदण्डखण्डनम् जानकीहृदयानं
दचन्दनंरघुनंदनम् अत्रव्यंग्यः कोप्यर्थस्तादृशोनास्तिअत्रसर्वत्रवक्तुरेवतात्पर्यंनियामकम् तज्ज्ञानमेवबोधोपयोगितदभावादधम
मित्युच्यते प्रपञ्चितंचेदंमयैववाक्यरत्ने ननुव्यंजनावृत्त्यंतरमित्यत्रकिंमानमिति॥उच्यते॥भद्रात्मनोदुरधिरोहतनोर्विशालवंशोन्नतेः
कृतशिलीमुखसंग्रहस्य यस्यानुपप्लुतगतेः परवारणस्यदानांबुसेकसुभगः सततंकरोभूत् अत्रप्रकरणेनभद्रात्मनइत्यादिपदानांराज्ञित
दन्वययोग्येचार्थेऽभिधानियन्त्रणेपिगजस्यतदन्वययोग्यस्यचार्थस्यव्यञ्जनयैवप्रतीतिः वस्तुतस्तुअद्यारभ्यचिरंसाधोनिः शंकमिहसंच
र रेवाकुंजेमृगेंद्रेणसदुष्टश्वाद्यघातितः अत्रभिक्षुकंप्रत्येवंवदंत्याः प्रतिवेशिनंप्रतिनिः शंकरत्यभिधानंस्फुटंइति किंचरेवाकुंजस्यरतस्था
नत्वंलभ्यते सिंहबुद्ध्यापरेणनगन्तव्यम् सिंहस्तुवस्तुगत्यानास्त्येव तदेतद्व्यञ्जनांविनाप्रकारांतरेणलब्धव्यमित्याशंकैवनास्तीति॥इत्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुलानांधुरिकीर्त्तनीयासनन्दिनीस्तन्यमनिन्दितात्मा इत्यादौप्रकर्षलाभवदित्यवधेयम् किंचित्पदमनपेक्ष्यरूढिकम्॥यथा॥सिंहाद
वापद्विपदंनृसिंहइत्यादौ किंचिद्यानपेक्ष्ययौगिकम्॥यथा॥क्षीराम्भोधेरित्यादौ अन्यथाऽनन्वयापत्तिः किंचवामनयनावामोरुरिति
भवति नतुवामवदनावामपाणिरिति सर्वंचेदंक्वचिदेकपदेअतउक्तंस्वभावेति तत्किंयत्व्यञ्जनापिपदमात्रवृत्तिरेवनेत्यतआह॥
व्यञ्जनार्थेन्नयेपिच शक्यलक्ष्यव्यङ्ग्यात्मकइत्यर्थः॥शक्यार्थस्यव्यञ्जकतायथा॥अवलोकयनिष्पन्दोविशिनीपत्रेबकोभाति निर्म
लमरकतभाजनोपरिस्थितोविमलशंखशुक्तिरिव अत्रनिष्पन्दशब्दस्यार्थेनक्रियाविरहेणवकगतमाश्वस्तत्वंव्यज्यते॥लक्ष्यार्थस्यय
था॥मुखंविकसितस्मितंवशितवक्रिमप्रेक्षितंसमुच्छलितविभ्रमागतिरपास्तसंस्थामतिः उरोमुकुलितस्तनंजघनमंसबंधोद्धुरंवते
न्दुवदनातनौतरुणिमोद्गमोमोदते अत्रविकासः पुष्पधर्मोमुखेनुपपन्नइतिलक्षितेनप्रसृतत्वेनलोकोत्तररमणीयतात्मकातिशयो
व्यज्यते॥एवमग्रेपिव्यंग्यार्थस्ययथा॥अवलोकयइत्यादावेवव्यंग्येनाश्वस्तत्वेनदेशस्यसंकेतयोग्यत्वंव्यज्यते॥त्रिविधस्यापीति॥उत्त
ममध्यमाधमात्मकस्य तत्रवाच्यनिरूपितव्यंग्यप्रकर्षाधारत्वमुत्तमत्वम्॥यथा॥निःशेषच्युतचन्दनमित्यादौ वाच्यापेक्षयाव्यंग्यार्थे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०शे० सादिपदे॥तृतीयावृत्तिर्व्यंजनायथा॥निःशेषच्युतचंदनंस्तनतटंनिर्मृष्टरागोधरोनेत्रेदूरमनञ्जनेपुलकितातन्वीतवेयंतनुः मिथ्यावा
५ दिनिदूतिबांधवजनस्याज्ञातपीडागमेवापींस्नातुमितोगतासिनपुनस्तस्याधमस्यान्तिकम् अत्राधमपदेनरंतुंगतासीतिव्यज्यते ननुर
विरसंगतइत्यादौतान्येवपदानिकथंश्रोतॄणांविचित्रबुद्धीरुत्पादयंतीत्यतआह विचित्रसहकारिणाम् तदेवहिपदंस्वरससमभिव्या
हारप्रकरणतात्पर्यज्ञानादिरूपसहकारिभेदात्तत्तद्धियमुत्पादयति दण्ड इवगवाभ्यजनघटौ ननुशक्यादिकमानुपूर्वीविशेषवि
6 शिष्टवर्णसमुदायेतत्कथमेकदेशस्यबोधकता॥अतआह॥स्वभाववैचित्र्यजुषाम् विचित्रस्वभावानिखलुपदानिभवंति क्वचिदे
कदेशस्याद्यस्यबोधकता यथाभीमसेनबलदेवादिपदादौ॥क्वचिच्चरमस्ययथा॥मतंगजवसुंधराधराधरपदादौ साचतत्तत्पदस्म
रणेनप्रकारान्तरेणचेत्यन्यदेतत् किंचकर्णावतंसपदवत् शक्यतावच्छेदकस्यपृथगुपादानेनापिनपौनरुक्त्यंभवतियथा करिवृं
हितमयूरकेकादौक्वचित्॥शक्यस्यापियथा॥उदयाचलकारागृहादौ उदयपदस्यपूर्वाचलेकारापदस्यवन्दिगृहेशक्यत्वात् किंच प
रस्परविरुद्धतयातिरस्कृततृतीयकोटिकमिवान्यतरप्रतिक्षेपेपरस्यैवलाभंजनयति॥यथा॥शीतेतरानुसकराद्धिमांशोः इत्यादौ अपं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मभवतोभगवन्ननास्या स्मृत्वातदेहिसगरंचभगीरथंचदृष्ट्वाथवाममधनुष्वशिलीमुखांश्च अत्रसगरंचभगीरथंचेत्यादिवाक्यस्यप्रा
गुपकाराभिप्रायेणदृष्ट्वायावदुपकारसामर्थ्याभिप्रायेणनिवेशनान्मुद्राप्रदायिता॥विभक्तिमुद्रायथा॥श्रियंप्रदुग्धेविपदोरुणद्धियशांसि
सिसूतेऽविनयंप्रमार्ष्टि संस्कारशौचेनपरंपुनीतेशुद्धाहिवुद्धिः किलकामधेनुः अत्रप्रदुग्धइत्यादितिङ्भक्तीनांद्वयोर्द्विकर्मयोर्निवेश
नान्मंगल्यामंगल्या   र्थकानामपिमंगल्यएवाभिप्रायवशाद्विभक्तिमुद्रा॥वचनमुद्रायथा॥विश्वंभराभगवतीभवतीमसूतरा
जाप्रजापतिसमोजनकः पिताते तेषांवधूस्त्वमसिनन्दिनिपार्थिवानांयेषांगृहेषुसविताचगुरुर्वयंच अत्रवयमितिवचनेनसवितु
रहंमहानित्यभिप्रायाद्वचनमुद्रा प्रयोजनेयथैतासांरसमैत्रीचविस्तरः तथालंकारसर्वस्वेसप्रपंचमदर्शयम् इत्यलंकारशेखरउप
क्रमरत्नेरीत्यादिवहिरंगत्रयमरीचिः॥अथवृत्तिंविभजते॥पदानांवृत्तयस्तिस्रः तिस्रोवृत्तयः पदानांभवन्ति शक्तिर्लक्षणाव्यंजनाचे
तितत्रशक्तिरीश्वरेच्छायासंकेतइत्युच्यतेसापदेषुप्रसिद्धैव॥साच॥कोशव्याकरणाप्तोक्तिवाक्यशेषोपमादितः प्रसिद्धपदसंवन्धाद्व्यव
हाराच्चवुध्यते लक्षणाशक्यसम्वन्धः साचतात्पर्यानुपपत्त्यामुख्यार्थानुपपत्त्यावाप्रवर्तते॥यथा॥निर्माल्यंनयनश्रियइत्यादौनिर्माल्यदा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लंकारशेखरेउपक्रमरत्नेवृत्तिमरीचिः॥दोषःसर्वात्मनात्याज्योरसहानिकरोहिसः अन्योगुणोस्तुवामास्तुमहान्निर्दोषतागुणः॥दण्डीच॥त
दल्पमपिनोपेक्ष्यंकाव्येदुष्टंकथंचन स्याद्वपुःसुन्दरमपिश्वित्रेणैकेनदुर्भगम् दोषत्वंचरसोत्पत्तिप्रतिवन्धकत्वम् रसकारणीभूताभाव
प्रतियोगियथार्थज्ञानविषयत्वमितियावत्॥अत्रप्रथमंपददोषानाह॥कष्टाप्रयुक्तसंदिग्धव्यर्थाश्लीलाप्रतीतकाः असाध्ववाचकौदोषाः
पदेष्टावेवभाषिताः॥कष्टंश्रुतिकटुयथा॥वर्हिनिर्ह्रादनार्हेस्मिन्कालेजीमूतमालिनि आलिङ्गितस्तन्वङ्ग्याकार्तार्थ्यंलभतांचिरात् अत्रव
र्हिनिर्ह्रादकार्तार्थ्यादिशव्दाः॥अप्रयुक्तम्॥तथाम्नातमपिकविभिर्नादृतम्॥यथा॥यतोयंदारुणाचारोनहन्तिसुरनिम्नगाम् अतोमन्ये
दैवतोस्यपिशाचोराक्षसोऽथवा अत्रहंतीतिगमनेदैवतशव्दःपुंसिकविभिर्नप्रयुक्तः॥संदिग्धम्॥सन्देहजनकम्॥यथा॥अपिधानेनहेवत्स
किमर्थमिहवर्तसे आरादेवास्तिसप्रायोयतस्तेभयमुत्थितम्॥अत्रापिधानाच्छव्दो॥व्यर्थम्॥प्रकृतार्थानुपयुक्तम्॥यथा॥विभर्ति
यश्चदेहार्द्धेप्रियामिन्दुंहिमूर्द्धनि सवेदेवःखलुत्वान्तुपुनातुमदनान्तकः अत्रचहिवैखलुतुशव्दाः अश्लीलमौज्ज्वल्याभाववत् तदपि
त्रिविधम् अमंगलव्रीडाजुगुप्साभेदात्॥क्रमेणोदाहरणम्॥विनाशान्मारुतेस्तस्यसुमरुत्साधानोपिसन् नासाग्रेणससुग्रीवोवायुंत्यज

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०शे० तिकेचलम् अत्रविनाशसाधनवायुशब्दः॥अप्रतीतम्॥ स्वशास्त्रमात्रप्रसिद्धम्॥ यथा॥त्रुटौविश्रान्तिरित्येकेपीलावस्तीतिचापरे
७ त्वन्मध्यमाणिमातन्विनकेनापिविभाव्यते॥अत्रत्रुटिपीलुशब्दौ॥असाधुअनुशासनविरुद्धम्॥यथा॥शातोदरिकथंकारंमानमेत
च्चिकीर्षसि मानिनीमानदलनोविजयत्येषचन्द्रमाः॥अत्रमानमेतद्विजयतीतिअवाचकम्॥प्रकृतार्थाशक्तम्॥यथा॥भूयोमत्त
द्विरदगमनांहारकेयूरयुक्तांपीनोत्तुङ्गस्तनभरलसन्मध्यभागाभिरामाम् स्मेरोद्यन्नवकिसलयस्पर्द्धिताम्राधरौष्ठींलक्ष्मीमक्षिस्फु
रितवदनामन्वहंसंस्मरामि अत्रलक्ष्मीपदमङ्गनायाःग्राम्यत्ववाचकाश्लीलान्यतरान्तर्भावान्नपृथगिति॥इत्यलंकारशेखरेदोष
रत्नेपददोषमरीचिः॥अथेदानींसाधारणान्वाक्यदोषानाह न्यूनंविसंधिव्याकीर्णसमाप्तपुनरात्तकम् भग्नक्रमयतिच्छन्दोवाक्य
गर्भमरीतिमत् अविमृष्टविधेयांशंसमुदायार्थवर्जितम् विरुद्धमतिकृद्वाक्येदोषाद्वादशकीर्तिताः तत्रन्यूनमन्वयबोधप्रयोज
कपदशून्यम्॥यथा॥तथाभूतांदृष्ट्वानृपसदसिपाञ्चालतनयांवनेव्याधैस्सार्द्धंसुचिरमुषितंवल्कलधरैः विराटस्यावासेस्थितम
नुचितारंभनिभृतंगुरुःखेदंखिन्नेभजतिमयिनाद्यापिकुरुषु अत्रस्थितमित्यनंतरमस्माभिरिति खिन्नइत्यस्मात्पूर्वमित्यमिति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चदातुमर्हति॥विसंधिः सन्धिविरहोविरुद्धसंधिश्च॥आद्योपिद्विविधः॥ऐच्छिकः प्रगृह्यादिनिबन्धनश्चऐच्छिकस्तत्कृदपिदोषः मेघानि
लेनअमुनाएतस्मिन्नद्रिकाननेपादपाउत्तमाउच्चाइदानीमेवपातिताः॥चरमश्चतुर्विधः॥अश्लीलंकष्टंउत्वप्राप्तविसर्गोलुप्तविसर्गश्च॥क्र
मेणोदाहरणानि॥ववुरिन्दीवरश्रेणिवान्धवायत्रवायवः मञ्जर्युद्गमगर्भासोतर्वाल्युर्वीविधूयते धीरोविनीतोनिपुणोवराकारोनृपोत्रसः
यस्यभृत्यावलोत्सिक्ताभक्ताबुद्धिप्रभाविताः आकीर्णिअवहितान्वयम्॥यथा॥मसृणचरणपातंगम्यतांभूःसदर्भाविरचयसिचयांतंमू
र्ध्निघर्मः कठोरः तदितिजनकपुत्रीलोचनैरश्रुपूर्णैः पथिपथिकवधूभिर्वीक्षिताशिक्षिताच॥अत्रतद्गम्यताम्॥तद्विरचयेत्यन्वये तदिति
8 अवहितम्॥समाप्तपुनरात्तकम्॥समाप्तौप्रधानवाक्यार्थबोधेजातेपुनरुपात्तम्॥यथा॥निर्माल्यंनयनश्रियइत्यादौचिरादिति॥यथाच॥
केङ्कारःस्मरकार्मुकस्यसुरतक्रीडापिकीनांरवोझङ्कारोरतिमञ्जरीमधुलिहांलीलाचकोरध्वनिः तन्व्याकञ्चुलिकापसारणभुजाक्षेपस्ख
लत्कङ्कणक्वाणः प्रेमतनोतुवोनववयोलास्यायवेणुस्वनः अत्रवेणुस्वनइति॥भग्नक्रमंयत्रार्थः शब्दोवाक्रमेणनास्ति॥उभयंयथा॥तुरङ्ग·
मथमातङ्गं-प्रयच्छास्मैमदालसम् कान्तिप्रतापौभवतःसूर्याचन्द्रमसोःसमौ॥भग्नयतिर्यथा॥ रामेतटान्तवसतौकुशतल्पशायिन्यद्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ पित्यादौ अत्रावश्यकोपदशेषयतिर्नास्ति॥ भग्न छंदो यथा॥ ततः परमोमित्युक्त्वा प्रतस्थे मुनिमण्डलम् भगवानपि संप्राप्तः प्रथमोद्दिष्टमाश्र
८ मम् अत्र चतुर्थे गौरवे पञ्चमं लघु कर्तुमर्हति यत्राऽपर्यवसितवाक्यमध्ये तदनपेक्षवाक्यान्तरमनुप्रविशति तद्वाक्यगर्भम्॥ यथा॥ योग्यो
यस्ते पुत्रः सोयं दशवदनलक्ष्मणेन मया रक्षैनं यदि शक्तिर्मृत्युवशं नीयते विवशः॥ अत्र तृतीयपादगर्भता॥ अरीतिमत्॥ यां रीतिमुपक्रम्य
प्रवृत्तं तद्भङ्गवत्॥ यथा॥ गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु विस्रब्धैः क्रियतां
वराहपतिभिर्मुस्ताक्षतिः पल्वले विश्राममं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः अत्र तृतीयपादेन विहितकर्त्रौदत्यान्तभङ्गः॥ अवि
मृष्टविधेयांशम्॥ प्राधान्यानिर्दिष्टविधेयकम्॥ यथा॥ वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु वरेषु यद्बालमृगाक्षि मृ
ग्यते तदस्ति किं व्यस्तमपि त्रिलोचने अत्र जन्मोद्देश्यालक्ष्यकं विधेयम् तच्च समासप्रविष्टतया न प्राधान्येन निर्दिष्टम्॥ समुदायार्थवर्जि
तं यथा॥ जस्कवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मंगलानि तं ब्राह्मणी पृच्छति पुत्रकामा राजन्नुमायां लशुनस्य कोर्घः अथ विरुद्ध
मतिकृत् कुबेरस्यैव भगवान्भवानीरमणोहरः अकार्यमित्रमेकोसौ वासुदेवः किरीटिनः अत्र भवानीरमणाकार्यमित्रशब्दौ विरुद्धां मतिं
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कुरुतः अत्रासमर्थसमासोद्देशान्तरं गोवर्धनः॥यथा॥प्राक्प्रत्यक्पृथिवीभृतोः परिषदि प्रख्यातसंख्यावता मह्यापाद्भुततर्ककर्कशतया वि
च्छिद्य विद्यामदम् येकेप्युत्कलभूपतेतव सभासंभाविताः पण्डिताः पत्रं श्रीजयदेवपंडितकविस्तन्मूर्द्धि विन्यस्यति॥ इत्यलंकारशेखरेवा
ग्दोषमरीचिः अथार्थदोषानाह॥ अष्टार्थदोषा विरसग्राम्यव्याहतखिन्नताः हीनाधिकासदृक्साम्यं देशादीनां विरोधि च अत्र विरसं प्रस्तुत
रसविरुद्धम्॥यथा॥ किंरोदिषि विहारार्थैः सुतमरणशुचं जहीहि किं म्रियसे सफलय यौवनमधुना सममनुरक्तेन सुतनु मया अत्र करुण
शृङ्गारयोर्महान्विरोधः ग्राम्यमविदग्धोक्तिनिष्पन्नम्॥यथा॥स्वपिम्यद्यानवद्याङ्गि संप्रसादप्रस्तवान्तिके मनागूरु दृढं बालेकुञ्चितं समु
दञ्चय॥व्याहतं॥उपात्तविरुद्धम्॥यथा॥ विदृशवती शैलसुताविभावमङ्गैः स्फुरद्बालकदम्बकल्पैः साचीकृता चारुतरेण तस्थौ मुखे
न पर्यस्तविलोचनेन अत्र शैलदुहितृत्वभावप्रकाशनत्वे विरुद्धे एकेन प्रस्तरप्रकृतित्वस्यापरेण विदग्धत्वलाभात्॥ खिन्नमपुष्टम्
त्वत्प्रयाणसमुद्भूतधूलीलुम्पति भास्करम् कृपाणं पाणिना धत्ते शूरो नत्वत्समो भुवि अत्र धूल्युत्थापनकृपाणधारणयोः शूरसाधारण्या
त्॥शौर्यस्यापुष्टिः॥हीनोपमं यथा॥ क्वचिदग्रे प्रसरता क्वचिदापत्य निघ्नता शुनेव सारंगकुलं त्वया भिन्नं द्विषांबलम्॥अधिकोपमं यथा॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वसिष्ठवद्यंदासोहनूमानिवमूषिका सरस्वानिवकूपोयंमुनीयंश्रीरिवस्वयम् अत्रयद्यप्युपमेयानांप्रकर्षएव तथाप्यात्यन्तिकरसहा
नेःसोपिनप्रतीयते॥असदृशोपमंयथा॥निर्ययौरुद्रनयनात्सस्फुलिङ्गोमहानलः वर्षन्तीशीकरासारंगंगाहिमगिरेरिव अत्रस्फुट
मसादृश्यम्॥देशादिविरोधियथा॥तत्रदेशकालवयोवस्थादिविरोधःप्रतीयते॥यथा॥प्रवेशेचैत्रस्यस्फुटकुटजराजिस्मितदिशिप्र
चण्डेमार्त्तण्डेहिमकरसमानोष्ममहसि जलक्रीडापातंमरुसरसिवालद्विपकुलंमदेनान्धंविध्वंस्यः समपरपातैःप्रशमिनः अत्रप्रवे
शेचैत्रस्यस्फुटकुटजेतिकालस्य मरुसरसीतिदेशस्यमदेनान्धमितिवयसः प्रशमिनइत्यवस्थायाः इदंचतत्तच्छास्त्रतत्तत्प्रमाणतत्त
ल्लोकादिभेदादनन्तम्॥तत्रतु॥लोकस्यकवेश्चप्रसिद्ध्योर्विरोधः तत्रकविप्रसिद्धिरेवबलीयसीति॥यथा॥सुसितवसनालंकारायां
कदाचनकौमुदीमहसिसुदृशिस्वैरंयांत्यांगतोऽस्तमभूद्विधुः तदनुभवतःकीर्तिःकेनाप्यगीयतयेनसाप्रियगृहमगान्मुक्ताशंकाक्व
नासिशुभप्रदः अत्रकीर्त्तेर्ज्योत्स्नावत्प्रकाशतालोकविरुद्धापिकविसमयसिद्धेत्यदोषः ननुकथममीषांदोषता आकांक्षादिज्ञानास
त्वेशाब्दज्ञानाविलम्बादितिचेन्न वाक्यान्तरापेक्षयाकांक्षेसामग्रीवैलक्षण्यात् अन्यथाप्रतीतिवैलक्षण्यानुपपत्तेः तथाचान्वयवो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

धानुकूलाकांक्षासत्वेपिरसोत्पत्त्यनुकूलाकांक्षादिविरहोदोष इतिध्येयम् संप्रदायानुरोधेनशास्त्रेऽयंममवस्तुतः तादृक्काव्यंप्रकुर्वी
तयत्नोद्वेगोनधीमताम्॥इत्यलंकारशेखरेवाक्यार्थदोषमरीचिः श्लाघ्यागुणाइत्युक्तंयुक्तंचैतत्॥यदाह॥अलंकृतमपिश्राव्यंनकाव्यं
गुणवर्जितम् गुणयोगस्ततोमुख्योगुणालङ्कारयोगयोः॥उक्तंचश्रीपादेन॥शब्दार्थौकाव्यस्यशरीरम् आत्मारसोगुणाः शौर्यादिवत् दो
षाः काणत्वादिवत् अलङ्काराः कुण्डलादिवत्॥तान्विभजते॥गुणःसामान्यतोद्वेधाशब्देष्वर्थेषुचस्थितः दोषाणामपिदोषत्वंप्राहु
र्वैशेषिकान्गुणान् तत्रसंक्षिप्तत्वमुदात्तत्वंप्रसादो. क्तिसमाधयः अन्येवान्यसमावेशात्पंचशब्दगुणास्मृताः॥स्वल्पाक्षरेणभूयोर्थ
कथनंसंक्षेपः॥यथा॥तेहिमाचलमामंत्र्यपुनःप्रेक्ष्यचशूलिनम् सिद्धंचास्मैनिवेद्यार्थंतद्विसृष्टाःखमुद्ययुः श्लाघ्यविशेषण
10 वत्वमुदात्तत्वम्॥यथा॥श्रुत्वायंसहसागतंनिजपुरात्त्रासेननिर्गच्छतांशत्रूणामवरोधनैर्जलभरप्रस्यन्दलिम्पत्पुटाः शुभ्रेस
द्मनिपल्लविन्युपवनेवाप्यांनवांभोरुहिक्रीडाद्रौनवशाद्वलेविचलितग्रीवैर्विमुक्तादृशः अत्रशुभ्रेपल्लविनीत्यादिविशेषणानांश्ला
घ्यता झटित्यर्थप्रत्यायकत्वंप्रसादत्वम्॥यथा॥सविश्वजितमारेभेयज्ञंसर्वस्वदक्षिणम् आदानंहिविसर्गायसतांवारिमुचामिव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ कौशलादर्थविशेषलाभउक्तिः॥यथा॥कुशलंतस्याजीवतिकुशलंपृच्छामिजीवतीत्युक्तम् पुनरपितदेवकथयसिमृतांनकथया
१० मियाश्वसिति अत्रकुशलमकुशलंवेत्युत्तरेकर्तव्येजीवतीत्युक्तिविशेषाज्जीवितमात्रंलभ्यते॥अन्यधर्माणामन्यत्रारोपणंस
माधिः॥यथा॥नीलाब्जानांनयनयुगलद्राघिमाद्दत्तपत्रःकुंभावैभौकुचपरिकरःपूर्वपक्षीचकार भ्रूविभ्रांतिर्मदनधनुषोविभ्र
मानन्ववादीत् वक्त्रज्योत्स्नासितकररुचंदूषयामासतस्याः अत्रपत्रदानादिपदानांचेतनधर्माणामारोपणमिति॥इतिशब्दगुण
मरीचिः ॥ अथार्थगुणानाह॥भाविकत्वंसुशब्दत्वंपर्यायोक्तिःसुधर्मिता चत्वारोर्थगुणाःप्रोक्ताःपरेत्वत्रैवसंगताःसंगताअं
तर्भूताः॥तदाहुः॥अलंकाराश्रिताःकेचिद्दोषान्तर्गताःपरे चतुर्ष्वन्तर्गताःकेचित्तश्चत्वारएवते॥तत्रभाविकत्वमभिप्राय
पूर्वकाभिधानम् स्वयंदोत्यमितियावत्॥यथा॥दृष्टिंहेप्रतिवेशिनिक्षणमिहाप्यस्मद्गृहेदास्यसिप्रायेणास्यशिशोःपितानवि
रसाःकौपीरपःपास्यति एकाकिन्यपियामितद्वरमितःस्रोतस्तमालाकुलंनीरंध्रास्तनुमालिखन्तुजरठच्छेदानलग्रंथयः अत्रो
पपतिंप्रतिसंकेताभिप्रायेणैवमभिधानम्॥दारुणेऽर्थेदारुणपदतासुशब्दता॥यथा॥देवव्रतेवांछतिदीर्घनिद्रांद्रोणेचकर्णे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चपशोवशेषे लक्ष्मीसहायस्तवाद्यनन्तवात्सल्यवान्द्रोणिरपसहायः अत्र॥ मुमूर्षति मृते चेत्यर्थे ईदृक्पदत्ता क्रमेण पदद्वस्तु तत्क्र
माभिधानम्॥ पर्यायोक्ति यथा॥ प्रथममरुणच्छायस्तावत्ततः कनकप्रभस्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः उदय
तितततो ध्वान्तध्वंसक्षमः क्षणदामुखे सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः पत्रविशेषणद्वारा विशेष्यलाभः सा सुधर्मिता॥
यथा॥ अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीबालमन्दारपुष्पम् विरहविधुरचक्रद्वन्द्वबन्धुर्विभिन्दन्कुपि
तकपिकपोलक्रोडताम्रस्तमांसि अत्र पद्मिनीप्रकाशादीनां सूर्यनियतत्वात्तल्लाभः॥ इत्यर्थगुणमरीचिः॥ ८॥ इदानीं वैशेषि
कान्गुणानाह॥ पदवाक्यतदर्थेषु ये दोषाः पूर्वमीरिताः तेषां क्वचिद्दोषत्वं यत्तद्वैशेषिको गुणः उक्तानामेव दोषाणां विषयाव
स्थादिभेदाद्यद्दोषत्वं तदेव वैशेषिकगुणत्वमित्यर्थः॥ केचित्तु॥ एतेषामेव दोषाणां स्थाने ष्वेतेषु दोषतापरं न त्वस्ति गुणतापार्थ
क्यमनयोर्यतः अन्ये तु क्वचिद्दोषतामात्रं क्वचिद्गुणतापि तत्र सहृदयानामेव प्रतीतिः साक्षिणी॥ तदाहुः॥ अलङ्कारे गुणे दोषे रसे
वा काव्यसम्पदाम् प्रतीतिरेव विदुषां प्रमाणमवसीयते॥ श्रीपादस्तु॥ रसोत्पत्तिप्रतिबन्धकतयैवैतेषां दोषता यत्र केनापि निमि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेननरसप्रतिबन्धस्तत्रादोषत्वमुचितमेवेत्याह तत्रपदेषुयथासम्भवमाह अनुप्रासेषुनोकष्टम्॥यथा॥महाराष्ट्रेतुनोष्ट्रिणः इत्यादौ श्ले
षादौनाप्रयुक्तता येनध्वस्तमनोभवेनबलिजित्कायः पुरास्त्रीकृतोयोगङ्गांचदधेऽन्धकक्षयकरोयोबर्हिपत्रप्रियः यस्याहुः शशिमच्छि
रोहरइतिस्तुत्यंचनामामराः सोऽव्यादिष्ट भुजङ्ग-हारवलयस्त्वांसर्वदोमाधवः अत्रक्षयशब्दोगृहे निश्चस्तुतोनसन्दिग्धम्॥यथा॥पृथु
कार्त्तस्वरपात्रंभू षितनिःशेषपरिजनंदेव विलसत्करेणुगहनंसंप्रतिसममावयोस्सदनम् जयार्थयमकादिषुयथा दधत्युरोजद्वयमुर्वि
शीतलंभुवोगतेवस्वयमुर्वशीतलम् वभौमुखेनाप्रतिमेनकाचनश्रियाधिकायांप्रतिमेनकाचन॥अत्रचमत्कारः नाश्लीलंभगवत्यादिषु
॥यदाहुः॥भगिनीभगवत्यादौशिवलिङ्ग-गुहादिषु अभिप्रेतकुमार्यादौत्वश्लीलंनैवदुष्यति अश्लीलत्वयमत्रोक्तमितिध्येयम्॥दण्डिलु॥नि
ष्ठ्यूतो द्गीर्णवान्त्यादिगौणवृत्तिव्यपाश्रयम् अतिसुन्दरमन्यत्रग्राम्यकक्षांविगाहते॥तद्विदेनाप्रतीतकम्यथा सर्वकार्यशरीरेषुमुक्तां
गस्कन्धपंचकम् सौगतानामिवात्मान्योनास्तिमन्त्रोमहीभृताम् सहायाःसाधनोपायादेशकालौबलाबलौ विपत्तेश्चप्रतीकारः पञ्चा
ङ्गोमन्त्रउच्यते रूपंसंज्ञाच संस्कारोवेदनानुभवस्तथा इतिबौद्धाः शरीरेषुमन्यन्तेस्कन्धपंचकम्॥इतिभार्गवसर्वस्वे॥नासाध्वनुकृतौ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हुं हुं हुं न न म मेति युवत्या जल्पितं जयति मानधनायाः इत्यादौ नापि लक्षणादावयवाचकम् ॥ ॥ ॥ ॥ लक्षणादेरप्रयुक्ते एव वृत्तित्वादितिहृदयम् ॥ इदानीं वाक्येषु यथासम्भवमाह ॥ प्रतीत्यवाधान्न्यूनम् ॥ यथा ॥ तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव यत्रान्यत्क्रियापदं नास्ति तत्रास्तिर्भवतिर्वा प्रथमपुरुषे प्रयुज्यते इति न्यायेन यत्र तद्द्वयेन नापत्तिस्तत्र तद्दूषणमित्यर्थः एवं प्रकरणादिना पदान्तरस्य लाभे द्रष्टव्यम् ॥ अत उक्तम् ॥ प्रतीत्यवाधो दिति पादभेदे विसंधिर्न ॥ यथा ॥ यद्यपि न द्रुतिसरोषं मृगपतिपुरतो पि मत्तगोमायुः तदपि न कुप्यति सिंहो असदृशपुरुषेषु कः कोपः इन्द्रस्याशुचिशूकरस्य च सुखे दुःखे न नास्त्यन्तरं स्वेच्छाकल्पतया तयोः खलु सुधा विष्ठा च काम्याशनम् रंभा चाशुचिशूकरी च परमप्रेमास्पदं मृत्युतः संत्रासो असमः स्वकर्मगतिभिश्चान्योऽन्यभावः समः ॥ इति शान्तोदाहरणम् ॥ इह यद्यपि मदलिखित संधिविरहो न दोष इति तथाप्यनुशासनविरुद्धत्वादिसदृशपुरुषेष्विति पठनीयम् नव्याकीर्णं तु सापेक्षे अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ इत्यादौ ॥ नान्यवाक्ये समाप्तता समाप्तपुनरात्तं वाक्यभेदेन दोषः तं शरैः प्रतिजग्राह कालिंगो गजसाधनः पक्षच्छेदोद्यतं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ शस्त्रंशिलावर्षीव पर्वतः॥यथावा॥नकिलानुययुस्तस्यराजानोरक्षितुर्यशः व्यावृत्तायत्परस्वेभ्यः श्रुतौतस्करतास्थिता समस्तेयतिभङ्गेन
१२ यथा कल्याणानांत्वमसिमहसांभाजनंविश्वमूर्ते धुर्यांलक्ष्मीमलमपिभृशंधेहिदेवप्रसीद यद्यत्पापंप्रतिजहिजगन्नाथनम्रस्यतन्मेभद्रंभ
द्रंवितरभगवन्भूयसेमङ्गलाय विरुद्धंनतथावाक्येविरुद्धाधियमुत्पादयत्विस्वभिप्रायेणप्रयोगेतन्नदोषइत्यर्थः बालादेर्नार्थवर्जितम् आदि
पदेनवीरवातुलादिपरिग्रहः क्वाकार्यमित्यादौवाक्यार्थेयथासम्भवमाह विरसंनाप्रधानके॥यथा॥क्षिप्तोहस्तावलग्नः प्रसभमभिहतोप्या
ददानोंशुकान्तंगृह्णन्केशेष्वपास्तः चरणनिपतितोनेक्षितस्संभ्रमेण आलिङ्गन्योवधूतस्त्रिपुरयुवतिभिस्साश्रुनेत्रोत्पलाभिः कामीवार्द्रापरा
धः सदहतुदुरितंशांभवोवः शराग्निः वर्धिनकर्मणिग्राम्ये वर्ज्यैः पदैः पिशुनयेद्वरहस्यवस्त्वितिभावतोक्तेः॥सर्वत्रहेतुमाह॥रसहानेरयोगतः
॥अथसर्वसाधारणमदोषत्वमाह॥तत्रतत्राभिधातव्येतथानुकरणादिषु उन्मत्ताद्यभिधानेषुकोपिदोषोनविद्यते॥श्रीपादस्तु॥तदर्थातिशये
श्लेषेदैन्येकोपेवधारणे विषादेविस्मयेहर्षेपुनरुक्तंनदुष्यति॥इतिवैशेषिकगुणमरीचिः॥९॥अलंकारास्तुशोभायैइत्युक्तंतत्रसाधु गुणवत्य
पिनिर्दोषेःलंकारैःकाव्यराजनि जायतेन्यैवसुषमारत्नालङ्करणैरिव॥आहुश्च॥निर्दोषंगुणवत्काव्यमित्यादितत्रचमत्कारविशेषकारित्वमिति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सामान्यलक्षणम् शब्दार्थनिष्ठत्वेनविशेषितंविशेषलक्षणद्वयम् परम्परयारोपकारित्वंतदित्यन्ये तत्रप्रथमंशब्दालंकारान्विभजते चि
त्रंच वक्रोक्त्यनुप्रासगूढश्लेषप्रहेलिकाः प्रश्नोत्तरंचयमकमष्टालंकृतयोध्वनौ तत्रकौतुकविशेषकारिचित्रम् तच्चखड्गचक्रपद्मादिभे
दादनन्तम्॥ यदाह॥ सर्वतोभद्रधेन्वादिगोमूत्रीमुरजादिच गतप्रत्यागताद्यादिश्चित्रकाव्यंमुनीश्वराः तच्चमाघादौसुव्यक्तत्वान्नेहोदाह्रियतेअ
स्याभिप्रायेणोक्तंवाक्यमन्येनान्यार्थकतयायद्योज्यतेसावक्रोक्तिः एतदेववाकोवाक्यमुच्यते॥ यथा॥ कोयंद्वारिहरिः प्रयाह्युपवनंशाखामृगे
णात्रकिंकृष्णोहंदयितेबिभेमिसुतरांकृष्णाद्दहंवानरात् मुग्धेहंमधुसूदनोव्रजलतांतामेवपुष्पान्वितामित्थंनिर्वचनीकृतोदयितयामुग्धोहरिः
पातुवः॥ वर्णसाम्यमनुप्रासः॥ सचद्विविधोलाटानुप्रासश्छेकानुप्रासश्च तत्रासकृदावृत्तवर्णोलाटानुप्रासः॥ यथा॥ अनङ्गमङ्गलगृहापाङ्गभ
13 ङ्गितरङ्गितैः आलिङ्गितस्सतन्वङ्ग्याकृतार्थयतुमानसम् अनेकस्यकंजनस्यसकृत्साम्यंछेकानुप्रासः नितम्बगुर्वीगुरुणाप्रयुक्तावधूर्वि
धातृप्रतिमेनतेन चकारसामन्तचकोरनेत्रालज्जावतीलाजविमोक्षमग्नौ पदमेकंहृदाकृत्वातदनुप्रासकाम्यया आदिक्षान्तलिपौका
दिक्षान्तशब्दंविचिन्तयेदितिरहस्यम्॥ गूढंक्रियागुप्तादिः यथा॥ पुंस्कोकिलकुलस्यैतैर्नितान्तमधुरारवैः सहकारद्रुमारम्यावसन्तेकामपि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रियम्॥इदंचनानायदाहुः॥क्रियाकारकसम्बन्धगुप्तान्यामन्त्रितस्यचगुप्तंतथासमासस्यलिङ्ग-स्यवचनस्यच एकोच्चारणापह्नुतभेदत्वंश्ले
षत्वम् येनध्वस्तमनोभवेत्यादौ॥अयंचाष्टधायदाह॥विभक्तिपदवर्णानांलिंगस्यवचनस्यच भाषाप्रकृत्योर्भेदेनश्लेषास्युःप्रत्ययस्यच
प्रहेलिकास्फुटप्रश्नः साचच्युताक्षरादत्ताक्षरादिः यथा॥ विदग्धःसरलोरागीनितम्बोपरिसंस्थितः तन्वङ्ग्यालिंगितः कण्ठेकलंकूजति
कोविटः अत्रविटइत्यत्रविकारस्थानेघकाराद्दानेद्वितीयोर्थोभवति॥साचषोढातदाह॥च्युताक्षरा। दत्ताक्षरोभयंमुष्टिर्विंदुमत्यर्थवत्यपि
प्रश्नोत्तरमपिद्विविधम् वहिरन्तरश्चतत्रवहिःप्रश्नोत्तरम्॥यथा॥प्रायःकार्येनियुज्यन्तेजनास्तत्वेत्रकीदृशाः नाधेत्ययंभवेच्छब्दोनीवा
चीवदकीदृशाः॥सावधानाः अन्तःप्रश्नोत्तरं यथा॥ काहमस्मिगुहावक्तिप्रश्नेमुष्मिन्किमुत्तरम् कथमुक्तंनजानासिकदर्थयसियत्सखे
अतुल्यार्थत्वेसत्यानुपूर्वीविशेषविशिष्टनियतव्यञ्जनसमुदायाभ्यासोयमकम्॥यथा॥नवपलाशपलाशवनंपुरःस्फुटपरागपराग
तपंकजम् मृदुलतान्तलतान्तमलोकयत्ससुरभिंसुरभिंसुमनोभरैः तच्चेदंसंक्षेपेणसप्ताशीतिप्रकारमितिचान्यत्रविस्तरः॥ एतच्चित्र
मितिगोवर्द्धनः इत्यलंकारशेखरेशब्दालङ्कारमरीचिः॥१०॥अथार्थालङ्कारान्विभजते॥उपमारूपकोत्प्रेक्षासमासोक्तिरपह्नुतिः समाहितंस्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भावश्चविरोधः सारदीपकौ सहोक्तिरन्यदेशत्वं विशेषोक्तिविभावने एवंस्युरर्थालङ्काराश्चतुर्दशनचापरे॥ तत्रभेदेसतिसाधर्म्यंउपमा॥ अधि
कगुणवत्तयासंभाव्यमानमुपमानम् निकृष्टगुणवत्तयासम्भाव्यमानमुपमेयम्॥ तांविभजते॥ वाक्यार्थातिशयश्लेषनिन्दाभूतविपर्ययाः सं
शयोनियमः स्वंचविक्रियेत्युपमादृशा तत्रवाक्यार्थेनैववाक्यार्थोयत्रोपमीयतेसावाक्यार्थोपमा साचद्वयीप्रत्येकसादृश्यानपेक्षा॥ तत्सापे
क्षाच॥ आद्यायथा॥ कामिनीनयनकज्जलपङ्कादुत्थितोमदनमत्तवराहः कामिमानसवनान्तरचारी कन्दमुत्खनतिमानलतायाः॥ अन्या
यथा॥ त्वदाननमधीराक्षमाविर्दशनदीधिति भ्रमद्भृङ्गमिवालक्ष्यकेशरंभातिपङ्कजम् यत्रातिशयधर्मोपन्यासस्सातिशयोपमा॥ यथा॥ क
ल्पद्रुमोनजानातिनददातिबृहस्पतिः अयंचजगतीजानिर्जानातिचददातिच पदश्लेषनिबन्धनसाम्यंश्लेषोपमा॥ यथा॥ तमालपत्राभ
रणाराजतेविलसद्भ्रुवः बालेवोद्यानमालेयंसालकाननशोभिनी यत्रोपमानस्यनिन्दयाप्रतिक्षेपस्सानिन्दोपमा॥ यथा॥ नागेन्द्रहस्तास्त्वचि
कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः लब्ध्वापिलोकेपरिणाहिरूपंजातास्तदूर्वोरुपमानबाह्याः यत्रासंसृष्टज्ञानेनसंसर्गमारोप्यसाम्यप्रस
ञ्जनंसाभूतोपमा॥ यथा॥ उभौयदिव्योम्निपृथक्प्रवाहावाकाशगंगापयसः पतेताम् तदोपमीयेततमालनीलमामुक्तमुक्तालतमस्यवक्षः य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०शे ऽपमानस्यैवोपमेयता सा विपर्ययोपमा॥ यथा॥ अयसुललितयोषिद्भ्रूलताचारुशार्ङ्गः रतिवलयपदाङ्के चापमासज्य कण्ठे सहचरमधुहस्तन्य
१४ स्तचूताङ्कुरास्त्रः शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा॥ इत्यादौ॥ यत्रोपमानोपमेययोः संशयकोटिता सा संशयोपमा॥ यथा॥ किमिन्दुः
किं पद्मं किमु मुकुरबिम्बं किमु मुखं किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ खगौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ तडिद्वा तारा वा
कनकलतिका वा किमबला यत्र तथ्यान्यवृत्त्या साम्यलाभस्सा नियमोपमा यथा॥ कस्ते पुरन्दरादन्यः प्रतिमल्लो भविष्यति ऋते सहस्रकि
रणात्त्वत्प्रतापसमो हि कः यत्रोपमानान्तरविरहतात्पर्येण स्वसाम्यं सास्वोपमा॥ यथा॥ आघूर्णितं पक्ष्मलमक्षियुग्मं प्रान्तद्युतिश्चैत्यजितामृतांशु
अस्याइवास्याश्चलदिन्द्रनीलगोलामलश्यामलतारतारम्। अभेदानुमानवद्विह भेदोद्रष्टव्यः यत्रोपमेयमुपमानविकारतयोच्यते सा विक्रियोप
मा यथा॥ हरिणादयतन्नयनादथ पद्मात्पद्मपत्राच्च आहृत्य कान्तिसारं विधिरसृजत्सुभ्रुवो दृष्टिम्॥ श्रीपादस्तु॥ समभिव्याहारोपमाप्यस्तिः
सा यथा॰ प्रकृत्यैव मनोहारि वदनं हरिणीदृशः चन्द्रेल्हादकताकस्मात्पद्मकेन परिस्कृतः॥ अत्र सर्वत्र॥ न्यूनाधिकत्वशंका चेद्विभागेषु तद्दि
ष्यताम् किंचिद्विशेषमादाय भेदोभेदश्च कश्चन काचित्समस्तान्वयिनी क्रियामात्रान्वयापरा विशेषणान्वया काचिदुपमा कापि तत्परा॥ अ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्रयन्यूनतासाम्यमाधिक्यंयद्यद्वेवाभिधीयते अहोकाव्यस्यमाहात्म्यंसमतैवप्रतीयते॥तदाहराजशेखरः॥समानमधिकन्यूनंसजातीयंविरोधिच सकुल्यं
सोदरंकल्पमित्याद्याःसाम्यवाचकाः अलंकारशिरोरत्नेसर्वस्वंकाव्यसंपदाम् उपमाकविवंशस्यमातैवेतिमतिर्मम॥इत्यलंकारशेखरेअर्थालंकारेउपमाम
रीचिः॥अतिसाम्यादपह्नुतभेदयोरुपमानोपमेययोरभेदप्रत्ययोरूपकम्।यदाह तद्रूपकमभेदोयउपमानोपमेययोरिति॥ दण्डीच॥उपमैवतिरोभूतभे
दारूपकमिष्यतइति॥तद्विभजते॥ विरूढंचसमस्तंचव्यस्तंरूपकम् श्लिष्टंचरूपकंतस्मात्सैषापंचधास्मृतं तत्रयत्रोपमानविरुद्धोऽर्थस्तद्विरूढम् यथा
दिवानपरिभूयतेऽब्जमनागपि क्षीयतेनवाचरमवारिधेः पयसिलुप्तिमाविन्दति नचत्रिदशासुभुवांवदनकान्तिभिर्जीयते यशस्तुहिनदीधि
तिर्ज्जीयतिकोपिभूमीपतेः॥ समस्तंयथा॥ तस्याबाहुलतापाणिपद्मंचरणपल्लवम् मुखेन्दुरक्षिभ्रमरौसर्वस्वंपुष्पधन्वनः॥ व्यस्तंयथा॥
भुजौमृणालेवदनंसुधांशुः कुन्दानिदन्ताश्श्रवणौसरोजे स्मितंप्रसूनानिकरौप्रवालेपयोधरौभूमिधरौमृगाक्ष्याः॥रूपकरूपकंयथा॥मुखप
ङ्कजरङ्गेऽस्मिन्भ्रूलतानर्तकीतव नरीनर्तिलसत्स्वर्णकैतकीदललोचने॥श्लिष्टरूपकंयथा॥ राजहंसोपभोगार्हंभ्रमरप्रार्थ्यसौरभम् पुरा
तिसुषमांकान्तिमुखपंकेरुहेतव इदंचसमस्तासमस्तादिभेदादनन्तम् लक्षणाप्यत्रैवान्तर्भवति उपमानोपमेययोरभेदप्रतिपत्तेः तत्रापि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

 सत्वात्॥ तदुक्तम्॥ रूपकंलक्षणादिकमिति॥ साचद्विधा॥ समस्तासमस्तभेदात्॥ तत्राद्या यथा॥ उदयतिकनकाचलयोरुपरिचलसङ्गजस्र
 रुः तदुपरिघनान्धकारः कस्यकृतेधातुरीदृशीसृष्टिः॥ अन्त्यायथा॥ तामरसेसालसताजलमुचिकश्चिद्विपर्यासः निस्पन्दतालतायांकथयपति
कस्यापिपुण्यानि॥ इत्यलंकारशेखरे रूपकमरीचिः॥ अन्यनिमित्तकेवस्तुन्यन्यनिमित्तकत्वारोपणमुत्प्रेक्षायथा॥ गमनमलसयातैः कुम्भ
लक्ष्मींकुचाभ्यामविकलकरशोभामूरुकाण्डद्वयेन यदियमहरदेषांहेतुनानेननूनंनिजवपुषिकरीन्द्राः पांसुपूरंक्षिपंति॥ इयंच॥ सर्वालं
कारसर्वस्वंकविकीर्तिविमर्द्दिनी उत्प्रेक्षाहरतिस्वान्तमचिरोढास्मितादिव शंकेमन्येध्रुवंप्रायोनूनंजानामितर्कये इवेत्यादिभिरुत्प्रेक्षाव्य
ज्यतेकाव्यवर्त्मनि अन्यदभिप्रेत्यान्याभिधानं॥ समासोक्तिः॥ सैवचान्यापदेशः उच्यते॥ यथा॥ त्वंपीयूषदिवोपिभूषणमसिद्राक्षेपरिक्षेतकोमा
धुर्यंतवविश्वतोपिविदितामाध्वीकसाध्वीकथा एतत्किन्तुतवाप्यरुंतुदमिवभूमौनचेत्कुप्यसेयः कान्ताधरपल्लवेमधुरिमानान्यत्रकुत्रापिसः
किंचिदपन्हु त्ययदन्यार्थप्रदर्शनंसापन्हुतिः॥ यथा॥ सीत्कारंशिक्षयतिव्रणयत्यधरंतनोतिरोमांचम् नागरिकः किमुमिलितोनहिनहिसखिहैम
नः पवनः आरब्धानुकूलाकस्मिकसहकारिलाभः समाहितम्॥ यथा॥ मानापनोदनविधौमदिरेक्षणायायावन्नमामिचरणावयतावदेव नीपस्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लन्नवसमीरपुरः सरागिप्रादुर्बभूवुरचिराद्घनगर्जितानि यस्यवस्तुनोयत्स्वभावतातदाख्यानंस्वभावः॥तदेवजातिरुच्यतेयथा॥चलतिक
थंचित्पृच्छयच्छतिवाचंकथंचिदालीनाम् आस्तितुमेचहिमनुतेगुरुगर्भभरालसासुतनुः॥ विरोधोद्विविधः॥ तत्राद्यःपारमार्थिकाविरोधेपि
औचित्येनविरोधिताप्रतीयतेयत्रसः॥यथा॥मनीषिताःसन्तिगृहेषुदेवतेत्यादौ॥द्वितीयस्तुयथा॥श्रुतेविरोधसंधानेःपियत्राभिप्रेतमासा
द्याविरोधः अयमेवविरोधाभासउच्यते॥यथा॥भक्तानांकामदस्तुष्टोरुषाकामदहन्नपि अपित्रानमयःस्थाणुर्ध्येस्तमीशंस्तुवीमहि उत्त
रोत्तरंयत्रसारोत्कर्षःससारः यथा॥विषयेषुतावद्बलास्तास्वपिगोप्यःस्वभावमृदुवाचःमध्येतासामपिसातस्याअपिसाचिवीक्षितंकि
मपि समस्तवाक्योपकारकत्वंदीपकत्वम् तच्चाभिन्नं च तत्तत्कारकक्रियादिभेदादनंतम्॥अभिन्नंयथा॥पाणौपद्मधियेत्यादौ॥भि
न्नंयथा॥नृत्यन्तिनिचुलोत्सङ्गेगायन्तिचकलापिनः बध्नन्तिचपयोदेषुदृशोहर्षाश्रुगर्भिणीः अत्रविस्तरभियासर्वेनोदाह्रियते एत
च्चमालादीपकभेदादनन्तम् अत्रपूर्वापरवाक्यार्थयोरुपकार्योपकारकंमालादीपकम् तत्रोत्तरस्यपूर्वोप कारकत्वम्॥यथा॥चारुता
वपुरभूषयदासान्तामनूननवयौवनयोगः तंपुनर्मकरकेतनलक्ष्मीस्तांमदस्तमपिवल्लभसङ्गः॥पूर्वस्योत्तरोपकारत्वं॥यथा॥सङ्गमा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ ङ्गणमागतेनभवताचापेसमासादिते देवाकर्णययेनयेनसहसायद्यत्समासादितम् कोदण्डेनशराश्शरैररिशिरस्तेनापिभूमंडलंतेनत्वं
१६ भवताचकीर्तिरतुलाकीर्त्याचलोकत्रयम्॥समानकालोक्तिः सहोक्ति स्याद्द्वयी उदासीनयोस्त्वरा प्रतियत्तयेकार्यकारणयोरपि॥आद्या
यथा॥सहदीर्घाममश्वासैरिमाः संप्रतिरात्रयः सममममशरीरेणक्षीयन्तेदिवसाअमी॥अन्त्यायथा॥वर्धन्तेसहपान्थानांमूर्च्छयाचूत
मञ्जरी पतंतिचसमंतेषामसुभिर्मलयानिलाः प्रयोज्यप्रयोजकयोर्वैयधिकरण्यमन्यदेशत्वम्॥यथा॥साबालावयमप्रगल्भवचसःसा
स्त्रीवयंकातरास्सापीनोन्नतिमत्पयोधरयुगंधत्तेसखेदावयम् साक्रान्ताजघनस्थलेनगुरुणागन्तुंनशक्तावयंदोषैरन्यजनाश्रितैरप
टवोजातास्मइत्यद्भुतम् कारणेसत्यपिकार्याभावोविशेषोक्तिः॥यथा॥आवातिवारिधरशीकरवारिवर्षीस्वैरंकदंबवनदुर्ललितःसमी
रः अङ्गेर्पितानिनलिनीनवपल्लवानितापस्तथापिसुदृशः शिथिलोनजातः कारणंविनाकार्योदयोविभावना॥यथा॥नाङ्गेषुरत्नाभरणा
निसन्तिनिश्वासहार्याण्यपिनांशुकानि तथापिसासम्प्रतिसारसाक्षीदिनेदिनेकामपिकान्तिमेति॥केचित्तु॥अन्यदेशत्वमेवविशेषोक्ति
विभावने अधिकरणद्वयमाहाय॥अन्येतु॥अनयोरेवैकेनापरस्यान्यथासिद्धिर्व्यतिरेकमादायइति गोवर्धनस्त्वन्यामेवान्यथा सिध्यान्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

देशत्वमेवनिराचकार व्यतिरेकालंकारस्त्वतिरिच्यतइत्येके॥ सच यथा॥ कादाचित्किं द्युतिंधत्तेकलङ्कीक्षीयतेन्वहम् दोषाकरः कथंकारं

त्वदाननसंमः प्रिये एकेनाप्रस्तुतस्यासिद्धिराक्षेपः सोपिद्वयगित्यपरे॥ यथा॥ इन्द्रेणकिंसयदिकर्णनरेन्द्रसूनुरैरावतेनकिमसौयदित

द्विपेन्द्रः दम्भोलिनाथलमयंयदितत्प्रतापः स्वर्गोप्ययंननुमुधायदितत्पुरीसा सुखबोधायबालानामतिकोमलवर्त्मना मयासंक्षेपणादि

त्यमलंकाराः प्रदर्शिताः यथैतेषांमिथोभेदः परेषांनातिरेकितातथालंकारसर्वस्वेसप्रपंचमदर्शयम् ॥ इत्यलंकारशेखरेलंकाररत्नम्

॥ उपमाकाव्यस्यसम्पदांसर्वस्वंसाचसाधर्म्यमिति इदानींतस्यप्रतियोग्यनुयोगिनावाह चन्द्रकलाम्बुजदामशिरीषंविद्युत्ताराकनकलताच

दमनककांचनयष्टीदीपः सर्वैरेभिर्योषिदुपम्या॥ यथा॥ शिखेवदीपस्यलतेवहैमीकलेवचान्द्रीस्त्रजिवाम्बुजानाम् शिरीषपुष्पंस्मरहेमयष्टी

सामेकदालोचनगोचरोस्यात् दमनकतरुशाखालम्बितोलङ्ग-युग्मंतुहिनकिरणबिम्बेखञ्जरीटप्रचारः विकचकमलकोशेदाडिमीबीजपंक्ति

स्थितयमिदमपूर्वंदृष्टमेकत्रचित्रम् तडिद्वातारावेत्यादौउद्भिन्नयारत्नशलाकयावेत्यादिदर्शनात्तथात्वंवर्ण्यतइत्याहुः अत्यंतानंदसन्दोहदा

यिनीपरिवर्ण्यते॥ यथा॥ साकौमुदीनयनयोरमृतैकवर्तिरानन्दपंकजवनीविलसल्लताभाप्राणास्मरस्यजनपुण्यतरोः फलानिसाफल्यमस्ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ जनुषाङ्कगतानजाने शक्तिर्मूर्तिमतीस्मरस्यजगतान्नारीमयंमण्डनङ्कान्तानामुपमानकल्पनकलाकान्तेः समुत्तेजनम्   लक्ष्मीः संसृति
७७ सागरस्यसरसीलावण्यपुण्याम्भसांसाराजव्रजजन्मसुषांसणमभूद्गानन्दपण्यस्थली रोचनास्वर्णविद्युद्भिर्हरिद्राभिर्विराटकैः चम्पकैर्हैमकै
तकाद्यावर्ण्यतेतत्तनोर्द्युतिः॥यथा॥प्रत्यग्रपद्मबीजद्युतिकांचनकेतकच्छायं गोरोचनातिगौरंवपुरपिसाह्यास्कृतंतस्याः चम्पकदामहरिद्रा
काञ्चनसौदामिनीनाञ्चह्रेपयतिकान्तिमेषानिजवपुषापद्मपत्राक्षी॥इदमपुपलक्षणम्॥तामग्रतस्तामरसांतराभामित्यादेः चेत्रत्वचातु
ल्यरुचांवधूनांकर्णान्ततोगण्डतलागतानि भृङ्गाः सखेलंयदिनापतिष्यन्कावेदयिष्यन्नवचम्पकानि॥इत्यादेश्च॥मोचात्वचःपञ्चपपाटला
नामित्यादेश्च काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमित्यादेस्तत्तत्काम्यमपिबोधव्यम् तमः शैवालपाथोदबर्हिभ्रमरचामरैः यमुना
वीचिनीलाश्मनीलाब्जाभ्रैःसमः कचः॥यथा॥नजीमूतच्छेदः सहिगगनचारीनचतमोनचास्येन्दोर्भ्रैर्गीनचमधुकरास्तेहिमुखराः नपिच्छंत
त्के किन्तुचितमसितोयंनचमणिर्मृदुत्वाद्वाशालंघनचिकुरपाशोमृगदृशः जानामिजानकिकलिन्दसुताजलेस्मिन्स्नातासिहन्तयदिमास्तवकुन्त
लानाम् वीचीषुनीलकमलस्रजिशैवलेषुदृश्यंतएवरुचयः कणशः प्रकीर्णाः तारांरहानांवदनस्यचन्द्ररुचाकचानांचनभोजयन्ती आकण्ठम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्योर्हितयेमधूनिमहीभृतः कस्यनभोजयन्ती कुर्पासेनस्थगितहृदया संपुटं हाटकीयं मस्तन्यस्तांचलनिवसना चामरंवारिदाभम् यत्रासीनार
तिरिवचर्णिक्येयसीवीथिकायांविक्रीणीतेमुकुलितमुखीसंज्ञयामौक्तिकानि अंगुल्यायद्दिनिर्दिशेद्रुणिमालासागुटीविभ्रमंवाचायद्वयमुद्
पारदवटीवुद्धिरदस्यद्युतिः दृग्भंङ्ग्यायदिनीलिमावितनुतेकाचस्रजः प्रत्ययंविक्रेतुंवतमौक्तिकानिभवतिव्यग्रावणिक्येयसी॥ इदमप्युपलक्ष
णम्॥पुनःपुनःकाचनकुर्वतीकचचक्रटाधियाधूपजधूमसंग्रहम् सखीस्मितैस्तर्कितनिजभ्रमावबंधतन्मूर्धजचामरंचिरात् इतिधूम
साम्यंबोधव्यम् पाशः पक्षश्चहस्तश्चकलापार्थाः कचात्परइतिरहस्यम् ललाटमर्धचन्द्रेणहेमपट्टिकयातथा केशान्धकारादथदृश्यभालस्थ
लार्द्धचन्द्रात्स्फुटमष्टमीयम् एतांयदासाद्यजगज्जयायमनोभुवासिद्धिरसाधिसाधु अधस्तादन्धकाराणामुपरिष्टात्कुरंगयोः सिन्दूरविन्दुसुभ
गादृष्टाकनकपट्टिका वल्लीस्मरधनुर्वीचिभृङ्गालीपल्लवैर्भुवौ॥यथा॥अथसुललितयोषिद्भ्रूलताचारुशार्ङ्गमित्यादि श्यामास्वंगंचकितहरिणी
प्रेक्षितेदृष्टिपातान्वक्त्रच्छायांशशिनिशिखिनांवर्हिभारेषुकेशान् उत्पश्यामिप्रतनुषुनदीवीचिषुभ्रूविलासान्हन्तैकस्मिन्क्वचिदपिनते चण्डि
सादृश्यमस्ति भ्रूपल्लवंमधुपराजिरुचांनिधिस्तेगण्डस्थलीकनकदर्पणदर्पहन्त्री हेकम्बुकण्ठिशुककिन्नरहंससवाणिप्राणाममासिमदनस्यचजे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०शे त्रमस्त्रम् चन्द्रादर्शैकपोलस्यसुव्यक्तमव्यवहितश्लोकद्वयं पाणौपद्मधियामधूककुसुमभ्रान्त्यापुनर्गण्डयोरित्यादिदर्शनात्तथात्वमपि
१८ वर्ण्यते मुखस्येन्दूत्क्रदर्पणाः किमिन्दुः किंपद्मं किमुमुकुरविम्बं किमुमुखमित्यादौ तिलप्रसूनंनासायाः। यथा॥ बन्धूकद्युतिबान्धवोय
मधरस्निग्धोमधूकच्छविर्गण्डश्चण्डिचकास्तिनीलनलिनश्रीमोचनंलोचनम् नासाभ्येतितिलप्रसूनपदवींकुन्दाभदन्तिप्रियेप्रायस्त्वन्मु
खसेवयाविजयतेविश्वंसपुष्पायुधः कामतूणीकृत्यनासावर्ण्यते इतिश्रीहर्षः नासावंशोमृगीदृशाम् नासानालीतिलोपममि त्यपिपठ
न्तिकण्ठः कम्बोःसमः स्मृतः॥यथा॥ हेकम्बुकण्ठिइत्यादौकम्बुग्रीवेतद्देवाष्टमान्यइत्यादौ मृगतन्नेत्रपाथोजतस्यन्नभखञ्जनैः ने
त्रञ्चकोरतन्नेत्रकेतकालिस्मराशुगैः॥यथा॥ चकोरनेत्रेणदृगुत्पलानांनिमेषयन्त्रेणकिमेषदृष्टः सारःसुधोद्गारमयः प्रयत्नाद्विधातुमेत
न्नयनेविधातुः हरिणादयतन्नयनादयपद्मात्पद्मपत्राक्षेत्यादि किमक्षेकिंमीनावित्यादि नयनेखञ्जनकमलेवाहूविलसन्मृणालविस
खण्डे वपुरपिशिरीषपुष्पंमुखमिन्दुस्त्वंशरल्लक्ष्मीः चकारसामत्तचकोरनेत्राविलोलनेत्रभ्रमरैर्गवाक्षा पूर्णादलैः काचनकेतकीनाम
होवधूनांपथगेवदृष्टिः॥केचित्तु॥कोशातकीपुष्पसमानकान्तिभिर्मुखैर्विनिद्रोल्वणवाणचक्षुषः ग्रामीणवध्वस्तमलक्षिताजनैश्चिरंधृतीनामुप

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रिव्यलोकयन् इतिमाघदर्शनात्कोशातकीत्वेनमुखंवाणत्वेननेत्रंवर्णनीयमितिवदन्ति॥ अन्येतु॥तयाप्रवृद्धाननचन्द्रकान्त्याप्रफुल्लच
क्षुः कुमुदःकुमार्य्याः प्रसन्नचेतस्सलिलः शिवोभूत्संसृज्यमानःशरदेवलोकः इतिदर्शनान्नेत्रंकुमुदोप ममित्याहुःप्रवालविम्व
वंधूकपल्लवैरधरोष्ठकौ वर्ण्यौमाधुर्य्यमाश्रित्ययावन्मधुरवस्तुभिः पुष्पंप्रवालोपहितंयदिस्यान्मुक्ताफलंवास्फुटविद्रुमस्थम् ततो
नुकुर्याद्विशदस्यतस्यास्ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य तन्वीश्यामा शिखरदशनापक्वविंवाधरोष्ठीमध्येक्षामाचकितहरिणीप्रे
क्षणानिम्ननाभिः श्रोणीभारादलसगमनास्तोकनम्रास्तनाभ्यांयातत्रास्ते युवतिविषयेसृष्टिराद्येवधातुः वंधूकद्युतिवान्धवोयमध
रइत्यादिजवाय्यत्रवर्णनीयेतिगोवर्द्धनः माधुर्यमाश्रित्येत्यादि यथा॥ त्वंपीयूषदिवोविभूषणमसीत्यादौमुक्तामाणिक्यनारंगदाडिमीकुन्द
19 कोरकैः ताराभिश्चरदावर्ण्याः कुर्य्यासेनस्थगितेत्यादौ तन्वीश्यामाशिखरेत्यादौ तदन्तानागरंगानिक्षोलङ्गानिपयोधरौ ओष्ठाधरौचवि
म्वानिसामेफलमयीप्रिया दमनकेत्यादि वन्धूकद्युतीत्यादि॥तत्कोरकैर्यथा॥अधरः किशलयमंघ्रीपद्मौकुन्दस्यकोरकादन्ताः कःकौके
कंकौकान् प्रहसतिहसतोहसन्तिहरिणाक्ष्याः तारंरदानामित्यादि वाणीहंसालिशुककिन्नरैः वेणुकोकिलवीणाभिर्माधुर्यमधुरैः सह य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०शे० ष्या॥ हेकम्बुकण्ठि शुकः किन्नरहंसचापीत्यादि तस्याःगोमुद्विरेफाणांकर्णोत्पलतांनेपातितानाम् स्वरसंचारिभिः कण्ठैः शालिगोपीजगुर्गुणान् क
७६ ण्ठः किमस्याः पिकवेणुवीणास्तिस्रोजितास्सूचयतिस्त्रिरेखः इत्यन्तरास्तु यत्काचिदन्ननलेनभेमीकलमालपन्ती माधुर्यमित्यादि मधुद्रोणी
वमन्दारमरन्दामन्दवृष्टिवत् सुधासारइवद्राक्षागोणीनाणीतवप्रिये वाहुर्बिसेनविद्युद्वल्लिमृणालैर्बिसमृणालयोरवान्तरभेदविवक्षयोक्तम् अ
स्याभुजा पां विजिताहिसात्किं पृथक्करोग्रहातत्प्रसूनम् इहैस्वतेतन्नुग्राहाश्रितैः कैर्नगीयतेयाकरएवलोकैः विद्युन्मृणालसुभगावाहुवल्लीमृ
गीदृशः यूनान्तुकण्ठकाण्डेषुजाताकनकशृङ्खला करस्तुपद्मेनपल्लवविद्रुमाभ्याम् करकिशलयेनसुदृशारागसरित्पंकजेनेव शिथिलितविद्रु
ममहसास्पृष्टोहंचेतनांनलेभे चन्द्रकलाकुन्दकोरकैश्चनखाः यथा॥ निर्भर्त्सिताशोकदलप्रसूतिपाणिद्वयंचारुनखंतदीयम् नवोदितेन्दुप्रतिम
स्यशोभांव्योम्नः प्रदोषेविफलीचकार निर्दोषरत्नसुभगैः कुन्दकोरककान्तिभिः नखैः कमलपत्राणिवालाचक्रेपृथक्पृथक् पूगाब्जतत्कोर
कविल्वतालगुच्छेभकुम्भाद्रिघटेशचक्रैः सौवीरजंबीरकवीजपूरसमुद्गकोलङ्कफलैरुरोजः यथा॥ कनककमुकायितंपुरस्तादथपङ्केरुहकोर
कायमानम् क्रमशःकमलायमानमास्तेसुदृशोनस्तस्तिकस्यभागधेयम् कलशीयतिकुचकमलंकमलीयतिलोचनभ्रमरः अणुकीयतिपुनरस्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

२०

हरिणदृशः प्रत्यहं मध्यः स्तनविल्वद्वयीतस्याः प्रययौ चक्रवाकताम् उड्डीय पुनरद्रीणां जहार विपुलश्रीयम् चिरप्रवासिंस्तववाटिकायां वि
भर्ति चत्वारि फलानि वीक्षतु सौवीरजम्बीरकवीज पूरतालान्यसौ धास्यति किं न जाने स्वर्गौ वा गुच्छौ वेत्यादि स्वयंभूः शंभुरंभोजलोचने त्वत्प
योधरः नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति संपुटं हाटकीयमित्यादि स्मनकतरुशाखालम्बि कोलद्वयुग्ममित्यादि महतोपि महीयांस
मणीयांसमणोरपि त्वत्प्रतीकं विदुर्नूनमणु मध्येन भस्तनि रेखाकान्तातिसुध्या मारोमालिस्तेन तादृशैः शैवालधूमभृंगालिलताद्यैरुपमी
यते नाभीविलादुच्चलिताभुजङ्गीरोमालिरस्येन्दुसुधालिलिक्षुः समीक्ष्य केशावलिवर्हिमालामुरोजगिर्योः समलीयतान्तः सुगममिदम् नाभी
रसातलावर्तह्रदकूपनद्यादिभिः यथा॥ मदनसरितमेतां गाहमानो जनो सौ जघनपुलिननाभीमण्डलावर्तरम्याम् मुखकमलस्तनाद्यामुल्लस
द्भ्रूलतोर्मि चिरविरहहुताशायासमुक्ताश्चकार त्वन्नाभिकूपः पाताले नितम्बस्तव मेदिनी पयोधरस्ते हेमाद्रिस्त्वं ममासि जगत्त्रयम् ह्रदनदसरौ
सिनाभिस्त्रिवलीतटिनीरसात्मकश्च वपुः तदपि तलोदरि संप्रतिकथमिव संतापमातनुषे वलीतटिन्यातद्रूपैस्तत्समैः पाशादिभिस्तदाह त्रि
वलीपाशैस्तयातयावद्धः कामस्य सोपानमिव प्रयुक्तमिति पृष्ठं कांचनपट्टकैः मुक्तावलिस्तेरदनाः पृष्ठं कांचनपट्टकम् नखांशवस्तेरत्नानिम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ध्येक्षीणास्मिकिंप्रिये शून्यगतलशून्याणुवेदीसिंहादिभिः समः मुष्टिग्राह्योभवेन्मध्यः अत्रमध्यस्यातिसूक्ष्मतयातस्याधान्येनोपमानता अत
एवमुष्टिग्राह्यतातलप्रमाणता सूक्ष्मत्वादेवमध्येशून्यताच अतएवसदसत्संशयगोचरोदरीत्यपिवर्णयन्ति जघनंपुलिनोपमं॥यथा॥मद
नसरितमेतामित्यादि पीठप्रस्तरभूचक्रैर्नितम्बः परिवर्ण्यते॥यथा॥नितम्बः स्वर्णपीठस्तेतवाङ्गुल्यब्जपल्लवाः ज्योत्स्नेन्दुपुष्पपीयूषफे
नकान्तिस्मितंतव तपनीयशिलाशोभाकटिरित्यादि नितम्बस्तवमेदिनीत्यादि चक्रेणविम्बंयुधिपुष्पकेतुः पितुर्जितंवीक्ष्यसुदर्शनेनंज
गज्जिगीषत्यमुनानितम्बमयेनकिंदुर्लभदर्शनेन विभ्रम्यतश्चारुनितम्बचक्रेदूतस्यदृक्कुतस्यखलुस्खलन्ती स्थिराचिरादास्ततदूरुरम्भा
स्तम्भावुपाश्लिष्यकरेणगाढम् रथचरणविशालश्रोणिलोलेक्षणेचेतिमाघात्स्वक्रान्तरद्वयसाम्यमप्यत्र ऊरुस्तुकरिहस्तेनकदल्याकरभेनच॥
यथा॥कदलीकदलीकरभःकरभः करिराजकरः करिराजकरः भुवनत्रितयेपिविभर्तितुलामिदमूरुयुगंनचमूरुदृशः चरणः पल्लवांभोजस्थल
पद्मप्रधालकैः यथा॥विजितप्रवालपल्लवकवलीकृतप्रोल्लसत्सुखमे पदकमलेकमलायाः लुठदलकः पातुदेवकीसूनुः अभ्युन्नतांगुष्ठनखप्र
भाभिर्विक्षेपणाद्रागमिवोद्गिरंतौ आजह्रतुस्तच्चरणौपृथिव्याःस्थलारविन्दश्रियमव्यवस्थाम् पूर्णेन्दुनाङ्गुष्ठनखौ॥यथा॥यशःपदाङ्गुष्ठनखौमु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वं च बिभर्त्ति पूर्णेन्दुचतुष्टयं या कलाश्चतुः षष्टिरुपैतिवासंतस्यांकथंसुभ्रु विमाननास्मात् गमनेहंसहस्तिवत्॥ यथा॥ गमनमलसयातैरित्या
दि साराजहंसैरिवसंन्नतांगीगतेषुलीलाञ्चितविभ्रमेष्वित्यादौकटाक्षोयमुनावीचिभृङ्गावलिविषामृतैः हालाहलम्वाविलसत्सुधावाभृङ्गाव
लीवायमुनोर्मयोवा निशाणघृष्टामदनेषवोवायद्वाक्टाक्षाहरिणेक्षणायाः ज्योत्स्नेन्दुपुष्पपीयूषफेनकैरवकहंसः इत्यादि हसोहास्यं॥ यथा
ज्योत्स्नापुष्पपीयूषइत्यादि नूनंतेचोरितातन्विस्मितेक्षणमुखद्युतिः स्नातुमंभः प्रविष्टायाः कुमुदोत्पलपङ्कजैः मुक्ताप्यत्रगणनीया मुक्ता
फलंवास्फुटविद्रुमस्थमित्यादेः दर्शनेवमदल्लादि यथा॥ धवलयदिवजगदखिलंह्रावयदिग विश्वमेवविशिरेवोषैः वमदिवकमलसहस्रंलोच
नमेपीदृशोजयति श्वासस्तुसुरभिसमः वहन्तिप्रातरंभोजसौरभोद्गारवासिताः मंदंमंदमभीवातानिश्वासास्तावकाइव हंससारसशब्दाभ्यांव
21 र्ण्यतेनूपुरध्वनिः॥ यथा॥ साराजहंसैरिवेत्यादि लीलाचलत्श्रीचरणारुणोत्पलस्फुरत्तुलाकोटिनिनादकोमलः शौरेरुचानूपमयाहरन्मनःस्व
रान्तरादुन्मदसारसारवः अत्रश्रीपादानुसारिकविकल्पलताकारएतावदधिकमाह वेण्याःसर्प्पोऽसिभृंगाल्योधम्मिल्लस्यविधुंतुदः सीमन्तस्या
ध्वदण्डोचभ्रुवोःसर्पक्रपाणकौ दन्तस्यजीरकाञ्जेयामदिराकुमुदेदृशोः जिह्वायास्त्वंचलोदोलानासायाः पाटली तथा॥ वल्लरीलहरीपाशःश

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०शे० स्वावाङ्कूरस्य च प्रवालशाखेऽङ्गुल्याः पल्लवश्च नखस्यतु रक्तपुष्पाणिनाभ्यास्तु विवराम्भोरुहे समे वीचिसोपाननिश्रेण्यस्त्रिवल्याइतिच
२१ स्त्रियाः पुंसान्तु वृषरक्ताक्षस्कन्धौ स्कन्धस्य सन्निभौ भुजौ वज्रस्य गमनमुष्णामित्यभिकीर्तितम्॥ गोवर्द्धनस्तु॥ शरीरतदवयवयोर्वर्णनीया
न्गुणानाह॥ सौन्दर्यं मृदुता कार्श्यमतिकोमलतातथा कान्तिरौज्ज्वल्यमावल्यमित्येते वपुषो गुणाः केशस्य दीर्घकौटिल्यमृदुत्वैविड्मनीलताः क
पोलेस्वच्छता कण्ठेब्रह्मधीयस्त्वं निरेखता नेत्रे सौन्दर्यं विशालत्वं लोलतापांगदीर्घता नीलताप्रांतलौहित्यं स्नेहसंनिविडपक्ष्मता अधरेत्यन्तमा
धुर्यमुच्छूनत्वं सुरक्तता दन्तस्य श्वेतलौहित्यं द्वात्रिंशत्तातिदीप्तता माधुर्यस्पष्टता वाचां मृदुता समता भुजे करेति मृदुता शैत्यं सर्वभागे
च शोणता स्तने श्यामाग्रता नत्यविस्तार दृढपाण्डुताः रोमाल्यां मार्दवं सौक्ष्म्यं श्यामता नाभिगामिता कान्तिवृत्तानुपूर्वत्वं जघयोर्नातिदीर्घता
अत्यन्तमन्दता शैत्यं निश्वासे तु सुगन्धिता॥ इत्यादि॥ मया संक्षेपशीलेन गच्छता मृदुवर्त्मनि सर्वेषामविरोधेन दिङ्मात्रमिह दर्शितम्॥ इत्य
लंकारशेखरे योषिद्वर्णनमरीचिः॥ इदानीं पुरुषवर्णनमाह॥ राज्ञामत्यन्तपीनत्वमुच्चता दीर्घबाहुता अत्र पुंसामिति वक्तव्ये प्रायशः कवीनांरा
जानएव वर्णनीया भवंति तानन्तर्गृह्णतो महर्षिणा राज्ञामित्युक्तम् यथा॥ व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः॥ इत्यादौ॥ युगार्गलभुजं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गेन्द्रदण्डस्तम्भेभहस्तकैः बाहू यथा॥ युवायुगव्यायतबाहुरित्यादि भुजेभुजंगेन्द्रसमानसारेइत्यादौ अमुष्यदोर्भ्यामरिदुर्गलुंठनेध्रुवंगृहीता
गलदीर्घपीनता उरः श्रियातत्रचगोपुरस्फुरत्कपाटदुर्द्धर्षतिरः प्रसारिता नागेन्द्रगमनः पीनमैरावतकरायतम् दोर्दंडंभुवनागारस्तंभंराजा
ममर्शसः वक्षः कपाटेनशिलापट्टेनवर्ण्यते॥ यथा॥ युवायुगव्यायतबाहुरंसलइत्यादि मध्येकार्श्यम्॥ यथा॥ अवन्तिनाथोयमुदग्रबाहु र्विशा
लवक्षास्तनुवृत्तमध्यः इत्यादि॥ उन्नततापदेयथा॥ कूर्म्माकारंचरणयुगलंधूतदिग्दन्तिशुण्डादण्डावूरूभुजयुगमपिव्यक्तनागेन्द्रशोभम् प्रायः
पृथ्वीधरणविधयेतत्समर्थान्यदार्था नेकीकृत्यत्रिभुवनसृजानिर्मितायस्यमूर्तिः स्तनयोरिवनारीणामत्यन्तस्वच्छताहृदि॥ यथा॥ सा
निर्मलेतस्यमधूकमालाहृदिस्थिताचप्रतिबिंबिताच ॥ ॐ ॥ ॐ ॥ कियत्यमग्नाकियतीचमग्नापञ्चेषुवाणालिरिवव्यलोकि नारीस्त
22 नस्वच्छता॥ यथा॥ प्रतिफलितंगलगरलंकज्जलवुद्ध्यापयोधरेदेव्याः प्रातः प्रोंछितुमिच्छम् गिरिजाहसितोहरोजयति कान्तिप्रयोजकंयावत्ता
वत्तद्रूपंवर्ण्यते तद्वद्योषिद्वयथा कृतावरोहस्यहयादुपानहौततः पदेरेजतुरस्यविभ्रती तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामेकिमुवद्ध
वर्मणी धातुताम्राधरः प्रांशुर्देवदारुवृहद्भुजः प्रकृत्यैवशिलोरस्कः सुव्यक्तोहिमवानभूत् चन्द्राननचन्द्रदिनंमृगलोचनमृगशिरस्वनसत्रम् कामंकम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लपत्राणांनेत्रेतस्यानुकारिणीइत्यादि॥ विस्तृतमन्यत्र इदमुपलक्षणम्॥ आह्लादत्वपुरस्कारेणचन्द्रादिसाम्यमुभयोरपि॥ यथा॥ इतिद्विजेनद्विज
राजकान्तिरित्यादि इन्दुप्रभामिन्दुमतीवभाषेइति स्फुरत्कमलपत्राभइतिश्रुतबोधेप्रतापोग्न्यादिवज्राद्यैः कीर्तिश्चन्द्रादिशुभकैः करेपद्मोर्ध्व
रेखादिपदेछत्रध्वजादिकम् गमनंहस्तिसिंहाभ्यांकाङ्क्षयंच्च भुजादिषु॥ स्फुटमिहोदाहरणम् गमनंयथा॥ पूर्वंयथादेवपतेर्नियोगंमूर्ध्नावह
न्कार्मुकबाणहस्तः प्राप्तस्तथैवाशुगजेन्द्रगामीप्रोद्भिद्यमानेनवयौवनेन ततोमृगेन्द्रस्यमृगेन्द्रगामीत्यादि स्युरुत्तरपदेव्याघ्रपुङ्गवर्षभकुञ्ज
राः सिंहशार्दूलनागाद्याः पुंसिश्रेष्ठार्थवाचकाः आदिपदादृषभोपिकर्तव्यारत्नसिंहाद्या नरराजादितः परात् विशेष्यभावोप्युसदांनरभूमिवि
शेषणात् यद्यत्वामुद्रिकाद्युक्तन्तद्रूपंयमुभयोरपि किन्तुशिष्टप्रयोगोऽन्नमयाकल्प्यतयेष्यते॥ इत्यलंकारशेखरेपुरुषवर्णनमरीचिः॥ इदानीं
सादृश्यप्रापकप्रकारानाह इवाद्यैः प्रतिमानाद्यैस्समानाद्यैर्निभादिभिः बंधुचौरारिवंश्याद्यैः सादृश्यप्रतिपत्तयः॥ तदाहुः इवाद्यैरिति॥ इवव
द्वायथाशब्दाः समाननिभसंनिभाः तुल्यसंकाशनीकाशप्रतिमाप्रतिरूपकाः सदृक्सदृशसंवादिशब्दाः सादृश्यवाचकाः॥ प्रतिमानाद्यैरि
ति॥ प्रतिमानंप्रतिबिंबंप्रतिमाप्रतियातना प्रतिच्छायाप्रतिकृतिरर्चापुंसिप्रतिनिधिरुपमोपमानंस्यात्॥ समानाद्यैर्निभादिभिरिति॥ वाच्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लिंगाः समानश्च सदृक्षः सदृशः शदृक् साधारणः समस्तुल्यः स्युरुत्तरपदेत्वमी निभसंकाससनीकाशप्रतीकाशोपमादयः वंधुरितिवन्धुर्भि न्नवयस्यंश्चप्रेयान्प्रीतः सुहृत्सखा उपमानोपमेययोरेवम्॥चौरेति॥ चौरैकागारिकस्तेनदस्युतस्करमोषकाः प्रतिरोधिपरास्कन्दिपाट च्चरमलिम्लुचाः मुखकान्तिचौरश्चन्द्र इत्यादिकर्तव्यम्॥अरीति॥ रिपुवैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः द्विड्विपक्षाहितामित्रदस्युशात्रवश त्रवः अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः चंद्रस्यवैरिमुखंइत्यादिकर्तव्यम्॥ वंशाद्यैरिति॥ संततिर्गोत्रजननकुलान्यभिजनान्वयौ वं शोन्ववायः संतानः सपिंडास्तुसनाभयः समानोदर्य्यसोदर्यसगर्भ्यसहजाः समाः सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः चन्द्रगोत्रं चन्द्रसोदरंमुखमित्यादिकर्तव्यम्॥ प्रकारान्तरमाह॥ भृतकाद्यैश्च भृत्याद्यैर्न्यक्कारार्थैः क्रियापदैः सन्देहतत्त्वाक्याद्यैः सादृश्यंप्रतिपद्यते भृतकाद्यैरिति भृतकोभृतिभुक्कर्मकरोवैतनिकश्चसः मुखस्यभृतकश्चन्द्र इत्यपिवोद्धव्यम्॥भृत्याद्यैरित्यादि॥भृत्येदासेयदासेरदासगोप्य कचेटकाः नियोज्यकिंकरप्रेष्यभुजिष्यपरिचारकाः मुखदासः शशीत्यादिकर्तव्यम्॥न्यक्कारार्थैरिति॥ न्यक्करोतितिरस्कुर्वन्प्रतिक्षिपतिभ र्त्सेति आक्रोशत्यवजानातिकदर्थयतिनिन्दति विडम्बयतिसंरुधेच्छंसतीर्ष्यत्यसूयति त्वन्मुखंचन्द्रंन्यक्करोतिइतिक्षेपन् तृणीकृतमधि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ क्षिप्तंनिरस्तंचलघूकृतम् अनादृतमवज्ञातमम्भोजंत्वन्मुखेन्दुना॥ सन्देहेति॥ यथा॥ किमिन्दुः किंपद्ममित्यादि तत्तद्वाक्यैरिति॥ तस्यपुष्णाति
२३ सौभाग्यंतस्यकान्तिंविलुंपति तेनसार्द्धंविगृह्णा तितुलान्तेनाधिरोहति तस्यच्छायांपदंधत्ते तस्यकक्षांविगाहते तमर्थमनुवध्नातितच्छीलंत
न्निषेधति तस्यचानुकरोतीतितमर्थमनुविंदति आकारयत्याहूयतेजिगीषतिसरोरुहम् विधिरम्भोजसाम्राज्येमुखेन्दुमभिषिञ्चति तस्या
मुखेनसदृशंकश्चन्द्रंकर्तुमिच्छति भवतीन्दुर्नदासोपित्वदास्यंचेत्किमिन्दुना चन्द्रमूर्ध्निपदंधत्ते वृथाचंद्रप्रतप्यसि लीयतेचन्द्रमाःक्वा
पिविभेतिचपलायते॥ दृष्टान्तु॥ प्रतिच्छन्दसरूपादिसजातीयानुवादिनः सलक्षणसपक्षाभसवर्णतुलितादिकम् कल्पदेशीयदेशादियेचान्यू
नार्थवाचिनः समासश्चवहुव्रीहिः शशांकवदनादिषु भवन्तीवादिशब्दाश्चसादृश्यप्रतिपत्तये॥ इत्याह॥ कवीनांघटनान्येवचराचरविलक्षणा
अकर्तुमन्यथाकर्तुंकर्तुंयासमतेजगत्॥ इत्यलंकारशेखरेवर्णकरत्नम्॥ इदानींकविसंप्रदायस्यसर्वोपेक्ष्याभ्यर्हितत्वंदर्शयन्नाह॥ असतो
पिनिवन्धेनसतामप्यनिवंधनात् नियमस्यपुरस्काराल्संप्रदायस्त्रिधाकवेः असतोपीतिवस्तुगत्यायन्नभवतितदपिकविभिर्वर्ण्यते॥ यथा॥ र
त्नानियत्रतत्राद्रौहंसाद्यल्पजलाशये जलेभाद्यंनभोनद्यामम्भोजाद्यंनदेष्वपि तिमिरस्यतथामुष्टिग्राह्यत्वंसूचिभेद्यता शुक्लत्वंकीर्तिपुण्यादे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कार्ष्ण्यं चाकीर्त्त्यघादिषु प्रतापे रक्तता मत्वे रक्तत्वं क्रोधरागयोः ज्योत्स्नापाने चकोराणां प्रवालं सर्ववीरुधाम् केसराशोकयोस्स्त्रीगण्डूषात्पाद
घाततः मासान्तरेऽपि पुष्पाणि रोमालिस्त्रिवलिस्त्रियाम्॥ सतामपीति पारमार्थिकमपि न निबध्यते॥ यथा॥ वसन्ते मालतीपुष्पं फलपुष्पे च चन्दने
कामिदन्तेषु कुन्दानां कुड्मलेषु च रक्तता नारीणां श्यामता पातः स्तनयोर्नम्रता तथा नियमस्येति हिमवत्येव भूर्यत्वक् चंदनं मलये परम् हेमन्त
शिशिरौत्स्वास्सर्वदा कमलस्थितिः॥ किंच॥ सामान्यग्रहणे शौक्ल्यं पुष्पाम्भश्छत्रवाससाम् ध्वजचामरहंसानां हारस्य वकभस्मनोः कृष्णत्वं स
र्वरसा हिमे घवारिधिवीरुधाम् भिल्लकाचासुराणां च धूमपंकशिरोरुहाम् लौहित्यं धातुमाणिक्यजवारत्नविवस्वताम् पद्मपल्लवबन्धूकदा
डिमीकरजादिषु पीतत्वं शालिमण्डूकवल्कलेषु परागके वर्षास्वेव शिखिप्रौढिर्माधवे च पिकध्वनिः॥ अन्यच्च॥ कमलासम्पदोः कृष्णहरितो
नागसर्प्पयोः पीतलोहितयोः स्वर्णपरागाग्निशिखासु च चन्द्रेशशेणयोः कामध्वजे मकरमत्स्ययोः दानवासुरदैत्यानामैक्यमेवाभिसंहितम्
॥ अपि च॥ चिरन्तनस्यापि तया शिवचन्द्रस्य बालता मानवामौलितो वर्ण्या देवाश्चरणतः पुनः भुवनानि निबध्नीयात्त्रीणि सप्त चतुर्दश चतस्रो
ऽष्टौ दश दिशश्चतुरः सप्त वारिधीन् अष्टादश स्मृता विद्याः चतस्रश्च चतुर्दश येऽस्थले तेजले जीवा भिन्दन्त्यर्कं करणे मृताः महत्त्वमादौ सर्गान्ते

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ सूक्ष्मताजगतामपि शैलादिर्भिद्यते शब्दान्नभः पूर्तिरथोद्गमं नामतत्तदुपाधौस्याच्छङ्करोवृषवाहनः चिह्नत्वेनवृषाङ्कोयंध्वजेसत्वाद्वृषध्व
२४ जः शूलीनसर्पीगिरिशः शशीनहरिणीविधुः इन्दुमौलिर्महादेवोगंगामौलिर्नतुक्वचित् रलयोर्डलयोश्चैववबयोः सशयोर्नभित् नानुस्वा
रविसर्गौचचित्रभङ्गस्यसम्मतौ इवचवाहिहीहस्मउतवैतुकिलैवच पदान्येतानिदेयानिपादस्याद्येनजातुचित् भूतेन्द्रभारतेशास्त्राक्रमह
च्छब्दोनिरर्थकः दुरर्थोब्राह्मणोवृष्टिभोज्योवधपथादिषु॥इत्यलंकारशेखरेसंप्रदायरत्नेनियममरीचिः॥अथसंक्षेपेणवर्णनीयमाह॥वर्ण्य
श्चराजादेवीचदेशोग्रामःपुरीसरित् सरोब्ध्यरण्योद्यानाद्रिप्रयाणरणवाजिनः हस्त्यर्कचन्द्रावृतवोविवाहोथस्वयंवरम् सुरापुष्पाम्बुसम्भो
गविश्लेषमृगयाश्रमाः कालान्तरंवयः सन्ध्याध्वान्तदूत्याभिसारिकाः॥एषांविशिष्यवर्णनमाह॥नृपेकीर्तिः प्रतापाज्ञादुष्टशान्तिविवेकिताः
धर्मप्रयाणसंग्रामशस्त्राभ्यासनयक्षमाः प्रजापालारिशैलादिनिवासोरिपुभूभृता औदार्यधैर्यगांभीर्यैश्वर्यस्थैर्योद्यमादयः देव्यांसौभाग्यलावण्य
शीलशृङ्गारमन्मथाः त्रपाचातुर्यदाक्षिण्यप्रेममानव्रतादयः देशेबहुरखनिद्रव्यपण्यधान्याकरोद्भवाः दुर्गग्रामजनाधिक्यनदीमातृकतादयः
ग्रामेधान्यलतावृक्षसरसीपशुपुष्टयः क्षेत्राद्रिकूटकेदारग्रामस्त्रीमुग्धविभ्रमाः पुरेट्टपरिखावप्रप्रतोलीतोरणध्वजाः प्रासादाध्वप्रपारामवा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पीवेश्यासतीनदी सरिदम्बुधिवापिवल्लीच्योवनगजादयः पद्मानिषट्पदाहंसचक्राद्याकुलशाखिनः सर स्तंभोलहर्म्यभोगजाद्यंबुजषट्प
दाः हंसचक्रादयस्तीरोद्यानस्त्रीपान्थकेलयः अब्धौद्वीपाद्रिरत्नोर्मिपोतमारोजलप्लवाः विस्नुकुल्यागमश्चन्द्रात्वृद्धिरौर्वौघपूरणम्॥अरण्ये
द्विपराहेभयूथसिंहादयोद्रुगाः काकोलूककपोताद्याभिल्लभल्लद्वादयः उद्याने सरणिःसर्वफलपुष्पलतादयः पिकालिकेलिहंसाद्याः क्रीडा
वाप्यध्वगस्थितिः शैलेमेघौषधीधातुवंशकिन्नरनिर्झराः शृंगपादगुहारत्नवनजीवाद्युपत्यकाः प्रयाणेभेरिनिस्वानभूकम्पबलधूलयः
करभोक्षध्वजछत्रवणिक्शकटवेशराः युद्धेतुवर्मबलवीरराजांसितूर्यनिर्घातनादशरमण्डपरक्तनद्यः छिन्नातपत्ररथचामरकेतुकु
म्भयोधाः सुरीवृतभटाः सुरपुष्पवृष्टिः अश्वेवेगित्वमौन्नत्यंतेजः सल्लक्षणास्थितिः खुरोत्खातरजः प्रौढिजातिर्गतिविचित्रता गजेसह
त्नयोधित्वमुच्चताकर्णचापलम् अरिव्यूहविभेदित्वंकुंभेमुक्तामदालयः॥सूर्येरुणतारविमणिचक्राम्बुजपथिकलोचनप्रीतिः तारेन्दुदीपकौ
षध्युलूकतमश्चौरकुमुदकुलटार्तिः चन्द्रेकुलटाचक्राम्बुजचौरविरहितमोर्तिरौज्वल्यम् जलनिधिजननेत्रकैरवचकोरचन्द्रास्मद्रुतिप्रीतिः
सुरभौदोलाकोकिलदक्षिणवातद्रुपल्लवोद्भेदाः जातीतरपुष्पचयाद्रुममञ्जरीभ्रमरझंकाराः ग्रीष्मेपाटलमल्लीतापसरः पथिकशोषवातो ४ त्काः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰ शे॰ सक्तुप्रपाप्रपालीमृगतृष्णाम्रादिफलपाकाः वर्षासु घनशिखिस्मयहंसगमापंककर्दलोद्भेदौ जातीकदम्बकेतकझञ्झानिलनिम्नगाहलिप्रीतिः शर
२५ दिन्दुरविपटुत्वं जलाच्छतागस्त्यहंसवृषदर्पाः सप्तच्छदासिताभ्ररुचिः शिखिपक्षमदपाताः हेमन्ते दिनलघुतामरुवकयवशीतसंपत्तिः ॥ शिशि
रे कुन्दसमृद्धिः कमलहतिर्वीगुडामोदाः ॥ विवाहे स्नानशुक्लाङ्गभूषातूर्यत्रयीरवाः वेदीसंगीतरामादिलाजमंगलवर्णनम् स्वयंवरे शचीरक्षाम
ञ्चमण्डपसज्जता राजपुत्रीनृपाकारान्वयचेष्टाप्रकाशनम् सुरापाने विकलतास्खलनं वचने गतौ लज्जामानच्युतिप्रेमाधिक्यं रक्तास्यता
भ्रमः पुष्पावचये पुष्पावचयः पुष्पार्पणार्थने दयिते मालागोत्रस्खलने क्रोधो वक्रोक्तिसंभ्रमाश्लेषाः जलकेलौ सरः क्षोभश्चक्रहंसापस
र्पणम् पद्मम्लानिः पयःक्षेपोक्षिरागो भूषणच्युतिः सुरते सात्त्विका भावाः सीत्काराः कुङ्कुमलाञ्छता काञ्चीकिङ्किणमञ्जीररवो रदनखक्ष
ताः विरहे तापनिश्वासचिन्तामौनकृशांगताः अब्दसंख्यानिशादैर्घ्यजागरः शिशिरोष्णता मृगयायां चसंचारो वागुरानीलवेषता मृगाधिक्यंमृ
गत्रासो हिंस्रेद्राक् त्वगतित्वरा आश्रमे तिथिपूजैणविश्वासो हिंस्रशान्तता यज्ञधूमो मुनिसुता द्रुसेकोवल्कलं द्रुमाः पद्मकेकोत्सवः प्रातर्मध्या
ह्ने तापसम्प्लवः सायं सूर्ये तितौ हिस्ये चक्रपद्मादिविप्लवः पूर्वे त्वग्रतनस्त्रीश्वसंधिंस्थापोपवर्णनम् सर्वशैशवतारुण्यमाध्यस्थ्यं विषमं चतत्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अन्धकारेतिकाठिन्यं विघ्नलोपसमर्थता आकस्मिकसमारंभो निःशंकमभिसारिता वृक्षे प्रचुरशाखत्वं दलादर्शितसूर्यता उच्चता प्रसवोत्कर्षो
वयःपथिकसेव्यता अभिसारे भयभ्रंशो मञ्जीरादितिरस्क्रिया साहसं रागितोत्कर्षो कालानुगुणवस्त्रता ॥ इत्यलंकारशेखरे वर्णनीयमरीचिः
नियमान्तरमाह ॥ श्वेताश्चन्द्रादयो ज्ञेया नीलाः श्रीकेशवादयः शोणास्तु सान्द्रधर्माद्याः पीता दीपशिखादयः धूसरा अथ धूल्याद्याः ज्ञातव्याः
काव्यवर्त्मनि ॥ अत्रैवज्ञातव्यं ॥ श्वेतानि चन्द्रशङ्खाश्वशंभुनारदभार्गवाः हलीशेषाहिशक्रेभौ सिंहसौधशरद्घनाः सूर्येन्दुकान्तनिर्मोकमन्दा
रद्रुहिमाद्रयः हिमहासमृणालानि स्वर्दण्डेभरदाभ्रकम् सिकतामृतलोध्राणि गुणकैरवशर्कराः नीलानि कृष्णचन्द्राङ्कव्यासरामधनंजयाः
शनिद्रुपदजाकालीराजपट्टविदूरजम् विषाकाशकुहूशस्त्रागरुपापतमोनिशाः रसावद्भुतशृंगारौ तथा पिच्छंवराहकः शौरिचोरयमोरस्कः कण्ठः
खञ्जनकेकिनोः कृत्याच्छायागजाङ्गारः खलान्तः करणादयः शोणानि सान्द्रधर्मश्चत्रेता रौद्ररसस्तथा चकोरकोकिलापारावतनेत्रं कपेर्मुख
म् तेजः पुष्परागमस्तंच भौमकुंकुमतक्षकाः जिह्वेन्द्रगोपखद्योतविद्युत्कुंजरबिंदवः पीतानि दीपजीवेन्द्रगरुडेश्वरसज्जदाः ब्रह्मावीररसस्व
र्णकलिद्वापररोचनाः किंजल्कचक्रवाकाद्याः हरितालं मनःशिला धूसराणि रजोलूताकरभोगृहगोधिकाकपोतमूषकोदुर्गाकाककंठखरादयः

26

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ इदमुपलक्षणम्॥हरिताः सूर्यतुरगाबुधोमरकतादयः इत्यपिबोद्धव्यम् द्वैरूप्येचाप्रसिद्धौचनियमोयमुदाहृतः अन्यद्वस्तुयथायत्स्यात्तत्तथैवो
२६ पवर्ण्यते॥इत्यलंकारशेखरेमुक्तादिनियममरीचिः इदानींनियमांतरमाह एकस्मादसहत्वंचयद्यद्वस्तुयथाभवेत् तत्तत्कविप्रयोगेनज्ञातव्यं
काव्यमिच्छता॥अत्रैवज्ञातव्यम्॥एकऐन्द्रः करीचाब्धौगजास्यरदमुक्तहृत् द्वयंपक्षनदीतीरनरश्रुतिभुजादिकम् त्रयंकालाग्निभुवनगंगा
मार्गेशदृग्गुणाः ग्रीवारेखामहीकोणस्तथाशूलशिखावली संध्यापुनःपुष्करागिरामविष्णुज्वरांघ्रयः चत्वारिवेदब्रह्मास्यवर्णाब्धिहरिबाहु
वः स्वर्ईतिदंतसेनांगोपाययामयुगाश्रमाः पंचपांडवरुद्रास्येन्द्रियस्वर्द्रुव्रतादयः महाभूतमहापापमहाकाव्यमहामखाः पुराणलक्षणंप्राण
निलावर्गेन्द्रियार्थकाः षड्ज्ञकोणत्रिशिरोनेत्रतर्काङ्गदर्शनम् चक्रवर्तीमहासेनवदनानिगुणारसाः सप्तपातालभुवनमुनिद्वीपार्कवाजिनः
वाराश्वस्वरराज्यांगव्रीहिवह्निशिखादयः अष्टौयोगाङ्गवस्वाशामूर्तिदिग्गजसिद्धयः ब्रह्मश्रुतिव्याकरणदिक्पालाहिकुलाद्रयः नवांगद्वार
भूखण्डरत्नरावणमस्तकाः व्याघ्रीस्तनसुधाकुण्डभृङ्गारादिरसग्रहाः दशहस्तांगुलीशंभुबाहुरावणमौलयः रूपावतारोदिग्विश्वेदेवाव
स्येन्दुवाजिनः एकादशमहादेवाः सेनाश्वकुरुभूपतेः द्वादशार्कराशिमाससंक्रांतिगुहबाहवः शारिकोष्ठकसेनानीनेत्रक्ष्मापतिमंडलाः त्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

योद्दशस्युस्तांबूलगुणाअथचतुर्दश विद्यान्वयस्वराश्चैवभुवनध्रुवतारकाः तिथयः स्युः पंचदशषोडशेन्दुकलास्मृताः अष्टादशद्वीपविद्यापुराणस्मृतिधान्यकम् विंशतीरावणभुजानेत्राद्यशतंतथा धार्तराष्ट्राः शतभिषक्तारकापुरुषायुषम् रावणांगुल्यब्जदलंशक्रयज्ञाध्वियोजनम् सहस्रंजाह्नवीवक्त्रंशेषशीर्षाम्बुजच्छदाः रविरश्म्यर्जुनकरवेदशाखेन्द्रदृष्टयः उदाहरणमेतेषांप्रसिद्धत्वान्नलिख्यते प्रहतेकेवलंयाथामार्दृशाः काव्यवर्त्मनि॥इत्यलंकारशेखरेसंख्यानियममरीचिः॥ इदानींप्रकारमुपदिशन्नेवकवीनांप्रकर्षबीजमाह॥गतागतंसमत्वंचसंस्कृतप्राकृतैक्यलाभम् तथावचनयोः साम्यंधर्मिधर्माभिधापिच कवयः कुर्वतेयत्नाः समस्यापूरणादिकम् आदिचतुष्टयंचित्रकाव्योपकारकम्॥तद्यथा॥ममतरुमध्यमसहासकारिकावररववनदानवसरसीरसगजभुजगतरुणीरुतरदसोदरनदभेदनवरभैरवकलपुलकपतदातपइत्यादिः चकाराद्साम्येकविस्फुटतार्थता राजानदीमालिकाराजतेदीनरक्षीपिनाकिनानन्दनवनसहसात्वनुतइत्यादिः रेजिरेबभूवतिष्ठतीत्यारभ्यातेसंस्कृतेत्यादियथा॥तत्रपुल्लिङ्गे॥हाराहारविहारसारसमयाः संभोगभोगाध्वराः संहारामरवारवारणरणाष्टंहारवीराकराः लोलोल्लाघविलासवायसहराहंकारहीरांकुरानीहारैरगतारगतरलागोविन्दकन्दोदनाः॥स्त्रीलिंगे॥धरणीधारणीगोणीरोहिणीरमणीमणी कंदलीलह

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

३०.३१० वीरंभानारीभेरीवसुंधरा॥नपुंसके॥जलफलपलमूलंवारिकीलालतूलंवलपललदुकूलंतिंगगंभीरकूलम् सलिलकपलचीरंतुच्छराजीवनीरंहलरज
२० तकुटीरंदारुनालंपटीरम् भणगच्छदेहिसंहरकुरुरेचयमारयावगच्छेहि अवलोकयावचिन्तयधारयरवादयेतिधातुजंविद्धि अेकस्मिन्नेवार्थे
बहुवचनैकवचनयोः॥साम्यंयथा॥ कम्बादेदेपिरोवारिफलिनोवर्हिणोनरः तादृशोभूरुहाद्याम्बमासफेरवसोमपाः एवंरथिमंथानशब्दाःखु
रणशादयः धर्मिधर्माभिधायिपदेयथा सुषिराद्वेप्रतीहारस्तुल्लपिल्लादिशान्नवः स्मेरालसौमत्सरश्चधर्मिधर्माभिधायकाः चकाराद्विशेषसामान्य
वाचकभावाभाववाचकपरिग्रहः॥तदुक्तम्॥शकुन्तधातुमरुतोगरुत्मत्कामदर्शनम् स्वच्छवंधूस्वगमनंचटकाद्याद्विवाचकाः अपिधाना
द्यपूपादिभावाभावप्रदर्शनम् आदिपदात्आरादयुतभिन्नअवतंसादिपरिग्रहः॥इत्यलंकारशेखरेचित्रकाद्युपकारमरीचिः॥समस्यापूर्णा
दिकमिति इदंतुकठिनसमस्याभिप्रायेणतदुक्तंकवयः शान्ताः तत्रैवंप्रकारेणयदीदंस्यात्तदेदंस्यात्कर्तौविषयमेतिच अयोग्यः खलुकःशब्दः
कुत्रसंसर्गधीर्नहि प्रश्नोत्तरात्पदेभङ्गात्पूर्वस्मिन्नाद्ययोजनात् मिथ्याभिधाप्यसावेवअेषसार्वत्रिकः क्रमः॥प्रश्नेति॥केमण्डयन्तिस्तन
मण्डलानिकीदृश्यमाचन्द्रमसः कुतःश्रीः किमाहसीतादशवक्त्रनीताहारामहादेवतातमातः॥पदेति॥मृगात्सिंहः पलायते मृगमत्तीति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मृगात्तेपलायमांसायइत्यर्थकरणात् पूर्वस्मिन्निति प्रत्यर्थिकीर्तिनिर्ज्जितकज्जलधवलंयावककुसुममितिग्म भावत् यथायथभावान्तरप्रकार
स्तु अतेतत्स्वप्नेमयादृष्टंचिचन्न्यस्तंविलोक्यताम् अरिष्टमेतत्तंजातमिंद्रजालंविभावय प्रबोधयतिबालांस्वपथायो प्रपूरयेत् सुबोधमिदम् प्र
कारान्तरंदेवर्षिवरशापाद्यैर्मणिमन्त्रौषधादिभिः मनोरथेनतपसायायात्पुण्यचयेनच माययाशंवरादीनांसर्वसंभावयेत्कविः तत्रहृद्रूपम् त
पस्तात्कालिकंपुण्यम्॥श्रीपादस्तु॥रागवात्सल्यशोकाद्यैर्विनयेनमदेनच मतिभ्रमेणशौर्य्येणविपरीतकरः पुमानित्यादि॥विशेषस्तु॥कल्प
द्यद्याःण्डसंसर्गप्रतिचक्षुषणुर्महान् युगान्तेचातिदूरोच्चनिकटेमहदप्यणुः हरेदृधोमुखत्वेतुविम्बाच्चविपरीतता दृक्पीडनात्तनुयूहाद्भा
वनाविम्वतोबहु तमोःकीर्त्यादिभिःकार्ष्ण्यंशौक्ल्यंज्योत्स्नादिकीर्तिभिः लौहित्यंरक्तपीतादिसन्ध्यारत्नकरादिभिः तिमिरंचद्भुताप्रयुक्तचक्षुर्भ्रा
न्तम् इयंचशैलीयतिपिपीलिकाइत्यादौ मशकीयतिकुञ्जरइत्यादौ विपरीतोऽभवज्जनइत्यादौ एकोपिसशतंनृपइत्यादौ मषीयतिजगत्त्र
यमित्यादौ श्वेतद्वीपायतेजगत् पद्मरागायतेजगत् क्रमेणवोद्धव्यम् कासांचित्समस्यानांनानाभुवनसंसर्गित्वात् तत्प्रकाराः प्रदर्श्यन्ते ज
गतः प्रलयेभूमिर्द्यौर्गौरुत्सस्तुधोद्धृतौ वलीन्द्रोहाटकेशीययात्रायांद्यौरसातले रसातलेइतितत्तीयान्वयी॥यथा॥द्यौर्विवेनजलेशार्ङ्गीत्वब्धि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

०.शे० मंथेद्वयंभुवि भुवीत्युभयान्वयी पातालंवारणेक्षिप्रेचन्दनद्रुमपन्नगैः ध्वजप्रासादधूलीभिर्भूमिः स्वर्गमुपाययौ श्रीकृष्णस्योदरेसर्वसंसर्गःसार्व
२८ कालिकः पातालंभूमिश्चस्वर्गंययाविल्मन्वयः अगस्त्यंभोधिपानादिपौराणिककथाशतैः शिवादिदेवसंचारैस्तादृश्येस्तर्ववर्णनम् शिवादीति
यत्रशिवोयातितत्रतन्नान्तरीयकतयासर्पचन्द्रानलादीनामपिगमनमवश्यकमित्यर्थः सादृश्यैरिति लक्षणायामूल्यमग्नेपर्वतद्वयमित्यादौ
औचित्येनसंग्रामेकुम्भिमुक्ताभिर्दिवातारकितंनभः॥राजशेषरस्तु॥उत्पाटितैर्नभोनीतैः शैलैरामूलबन्धनात् तांस्तानर्थानमालोच्यसम
स्यांपूरयेत्कविरित्याह॥वृद्धास्तु॥कः प्रत्येति प्रतीमोनद्राक्प्रत्येमिप्रतीहिच नहिनोतत्किमित्याद्यैरुक्तिमाश्रित्यपूरयेत्॥तथा॥पराजितश्च
द्भगवान्जरासंधेनजंतुना प्रतीतिरद्यमेयातामृगात्सिंहः पलायते मासंभावयशल्येनफाल्गुनस्यपराजयम् कः प्रतीयात्कुरुश्रेष्ठमृगात्
सिंहः पलायतेत्यादि नहिगांडीवकोदण्डोमृगाइत्यादि तत्किंकमलपत्राक्षमृगात्सिंहः पलायते सुबोधमखिलम् शब्दादुच्छलितेसिन्धौ
शैलाण्डाद्येविदालिते त्वत्प्रतापाद्द्रवीभूतेस्वर्णाद्रौमलिनेरवौ विरहेसर्वदहनःसंतोषेसर्वमेवशशी कामिनिसर्वकाम्यंशान्तेलोष्टायतेविश्वम्
वैशेषिकेषुकाव्येषुगुणेषूत्कृष्टमन्दयोः अपेक्षयाचतंसर्गेस्यातामुत्कृष्टमन्दते वैशेषिकेषुरूपादिपञ्चसु काव्येशौर्यौदार्यसौन्दर्यादिषु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अनालोकितकाव्यसरणिभिः स्वंवशीकर्तुमनतिचिरमनुसरन्कविः अन्वयैरजहल्लिंगैः साधारणविशेषणैः छन्दोज्ञात्वापृथग्वाक्यैः स्वबुध्यामान
सींश्रयेत् समस्यापदंवाक्यंस्मर्तव्यम् शिशूनांगतयेऽस्माभिर्दिङ्मात्रमिहदर्शितम् काव्यकान्तारपान्थानामीदृगर्थेक्रियाश्रमः॥ इत्यलंका
रशेखरेकविसामर्थ्यरत्नम्॥ रसआत्मेत्युक्तम् तत्रयथात्मानंविनाशरीरमप्रयोजकम् तथारसंविनाकाव्यम्तथाह साधुपाकेप्यनास्वाद्यंभो
ज्यंनिर्लवणंयथा तथैवनीरसंकाव्यंनस्याद्रसिकतुष्टये तत्ररसत्वमंगांगिभावापन्नसकलविभावादिसाक्षात्कारकत्वम् विशेषणंसमूहालं
बनवारणायरसत्वमपिजातिरितिवयम्॥ केचित्तु॥ कारणेनाथकार्येणसहकारिभिरेवच व्यक्तत्वंनीयमानस्तुस्थायीभावोरसःस्मृतः कारण
मंगनानवयौवनादिकार्याणिस्तंभः स्वेदोथरोमाञ्चः स्वरभङ्गोथवेपथुः वैवर्ण्यमश्रुप्रलयावित्यष्टौसात्त्विकामताः सहकारिणउद्यानादयः ग्ला
न्यादयः॥ यदाहुः॥ विभावैरनुभावैश्चसात्त्विकैर्व्यभिचारिभिः आरोप्यमाणउत्कर्षंस्थायीभावोरसःस्मृतः॥ तमिदानींविभजते॥ शृंगारहास्य
29 करुणरौद्रवीरभयानकाः बीभत्साद्भुतशान्ताश्चकाव्येनवरसाःस्मृताः भक्तिप्रलस्तुसुखज्ञानात्मरसवादिमतेनभवत्येवेतिदिक्॥ तत्रशृं
गारंविभजते॥ संभोगोविप्रलंभश्चशृङ्गारोद्विविधःस्मृतः तत्रस्त्रीपुंसलक्षणेदृष्टप्राप्त्योरतिरेवसंभोगः॥ तदुक्तम्॥ अनुरक्तौनिषेवेतांयत्रान्योन्यं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ.श्रो. विलासिनौ दर्शनस्पर्शनादीनि संभोगोऽप्युदाहृतः तत्रनायिकाश्रयसंभोगो यथा॥शून्यंवासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैर्निद्राव्याज

२९ मुपागतस्यसुचिरंनिर्वर्ण्यपत्युर्मुखम् विस्रब्धंपरिचुंब्यजातपुलकामालोक्यगंडस्थलींलज्जानम्रमुखीप्रियेणहसताबालाचिरंचुंबिता आलो

क्यनम्रमुखीत्यन्वयः॥नायिकाचतुर्द्धा॥अनूढाचस्वकीयाचपरकीयावराङ्गना त्रिवर्णिनः स्वकीयास्यादन्याः केवलकामिनः॥ तत्र॥अनुरक्ता

गुरुलोकेनस्वयंवास्वीकृताभवेत् सानूढेतियथाराज्ञोदुष्यन्तस्यशकुन्तला देवतागुरुसाक्ष्येणस्वीकृतास्वीयनायिका परकीयाप्यनूढेवविशेष

स्तुस्फुटस्तयोः सामान्यवनितावेश्याभवेत्कपटपण्डिता नहिकश्चित्प्रियस्तस्यादातारंनायकंविना अस्याः प्रकाशोऽप्यासांप्रच्छन्नोरमण

इति विशेषः ताश्चाष्टधा खण्डितोत्कण्ठिताप्रोषितपतिकाचाभिसारिका कलहांतरितावासकसज्जाविप्रलब्धिका स्वाधीनभर्तृकाचान्याचत

स्रः षष्टधामताः नायकाश्रयोयथा॥त्वंमुग्धाक्षिविनैवकञ्चुलिकयाधत्सेमनोहारिणींलक्ष्मीमित्यभिधायिनिप्रियतमेतद्वीटिकांसंस्पृशि श

य्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितोनिर्यातः शनकैरलीकवचनोपन्यासमालीजनः रूपसौभाग्यसंपन्नः कुलीनः कुशलोयुवा॥

अनुद्धतस्सूनृतवाक्नायकः प्रीतयेस्त्रियाः अयंबहुप्रकारोऽपिसंक्षेपेणचतुर्विधः॥अनुकूलोदक्षिणश्चशठधृष्टौचतेयथा लीनरागोनुकूलः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यादनन्यरमणीरतः दक्षिणश्चान्यचित्तोपियः स्याद्विकृतः स्त्रियाम् प्रियंवक्त्यप्रियंतस्याः कुर्वन्नविकृतोशठः धृष्टोज्ञातापराधोपिनविल
क्षोवमानितः॥विप्रलम्भस्तु॥भावोयत्ररतिर्नामप्रकर्ष मभिगच्छति नाधिगच्छतिचाभीष्टंविप्रलंभः सउच्यते अभीष्टंस्त्रीपुंसलक्षणमेव स
त॥पूर्वानुरागोमानात्मप्रवासः करुणात्मकः विप्रलम्भश्चतुर्द्धास्यात्पूर्वपूर्वोह्ययंगुरुः॥तत्र॥स्त्रीपुंसयोर्नवालोकादेवोल्लसितरागयोः ज्ञेयः पूर्वा
नुरागोयमलाभादतिकामयोः॥यथा प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्तास्तामुग्धदृशोनिसर्गमधुराश्चेष्टाभवेयुर्म
यि यास्वन्तः करणस्यबाह्यकरणव्यापाररोधीक्षणादाशंसापरिकल्पितास्वपिभवत्यानंदसान्द्रोलयः अथान्यावनिताशक्तमवगम्यस्ववल्ल
भम् ईर्ष्यावशेनवैमुख्यमेषमानउदाहृतः॥यथा॥सापत्युः प्रथमापराधसमयेसख्योपदेशंविनानोजानातिसविभ्रमाङ्ग-वलनावक्रो
क्तिसंसूचनम् स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पलावालाकेवलमेवरोदितिलुठल्लोलालकैरश्रुभिः प्रवासः परदेशस्थेद्वितीये
विरहोद्भवः यथा॥त्वामालिख्यप्रणयकुपितांधातुरागैः शिलायामात्मानंतेचरणपतितंयावदिच्छामिकर्त्तुम् अस्रैस्तावन्मुहुरुपचितैर्दृष्टि
रालुप्यतेमेक्रूरस्तस्मिन्नपिनसहतेसंगमंनौकृतान्तः॥इत्यादि॥स्यादेकतरपंचत्वेदंपत्योरनुरक्तयोः शृङ्गारः करुणाख्योयमजस्येवरतेरि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰शे॰ व ननुशृङ्गारस्यरतिप्रकृतित्वात्तस्याश्चसुखसंवेदनरूपत्वात्तस्यचविप्रलंभेऽभावात्सकथंशृङ्गारभेदइतिचेन्नधन्योहमस्याःकृतेदशामि
३० मामनुभवामिइतितत्रापितदभिधानात् क्वचित्संभोगपोषकत्वेनस्पृहणीयत्वाद्येतितेविस्तृतंमयैववाक्यरत्ने॥श्रीपादस्तु॥रतिर्भवतिदेवा
दौमुनौपुत्रेनृपेगुरौ शृङ्गारस्तुभवेत्सैवयाकान्ताविषयारतिः॥तत्रदेवेयथा॥कण्ठकोणविनिविष्टमीशतेकालकूटमपितेमहामृतम् अप्यु
पात्तममृतंभवद्वपुर्भेदवृत्तियदिमेनरोचते॥मुनौयथा॥हरत्यघंसंप्रतिहेतुरेष्यतः शुभस्यपूर्वाचरितैः कृतंशुभैः शरीरभाजांभवदीयदर्श
नंव्यनक्तिकालत्रितयेपियोग्यताम्॥पुत्रे॥एह्येहिवत्सरघुनंदनपूर्णचंद्रचुंबामिमूर्द्धिसुचिरंचपरिष्वजेत्वाम् आरोप्यवाद्धदिदिवानिश
मुद्वहामिवन्देथवाचरणपुष्करकंद्वयंते॥नृपेयथा॥तेकौपीनधनास्तएवहिपरंधात्रीफलंभुंजतेतेपांद्वारिनदन्तिवाजिनिवहास्तैरेवलब्धा
क्षितिः तैरेतत्समलंकृतंनिजकुलंकिंवाबहुब्रूमहेयेदृष्टाः परमेश्वरेणभवतातुष्टेनरुष्टेनवा॥गुरौयथा॥हातातविश्वजनवत्सलमामकी
नजीवौषधद्युमणिवंशवतंसभूत स्यांचेद्भवत्कुलजसद्मनिचेटकः स्यांयद्वाभवच्चरणपंकजरेणुरेव हासमूलः समाख्यातोहास्यनामार
सोबुधैः चेष्टाङ्ग-वेषवैकृत्याद्याद्योहासस्यचोद्भवः कपोलाक्षिकृतोल्लासोभिन्नोष्ठः समहात्मनाम् विदीर्णास्यश्चमध्यानामधमानांसशब्द

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कः॥यथा॥नपुंसकमितिज्ञात्वाप्रियायैप्रेषितंमनः तच्चतत्रैवरमतेहताः पाणिनिनावयम् शोकोत्थः करुणोज्ञेयस्तत्रभूपातरोदनं वैवर्ण्य मोहनिर्वेदप्रलयाश्रूणिवर्णयेत्॥यथा॥मदेकपुत्राजननीजरातुरानवप्रसूतिर्वरटातपस्विनी गतिस्तयोरेषजनस्तमर्दयन्नहोविधेत्वांकरुणारुणद्धिनो क्रोधात्मकोभवेद्रौद्रः क्रोधः प्रौढश्चवैरिणः भीष्मवृत्तिरसामान्योभवेदुग्रक्रियाश्रयः स्वांसघातस्वयंशस्त्रोत्क्षेपभ्रुकुटयस्तथा अत्रारातिजनाक्षेपोद्दलनंचोपवर्ण्यते॥यथा॥कृतमनुमतंदृष्टंवायैरिदंगुरुपातकंमनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः नरकरिपुणासार्द्धंतेषांसभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमिदिशांबलिम् उत्साहात्माभवेद्वीरोबलशस्त्राश्रयश्चसः नायकोऽत्रभवेत्सर्वैश्लाघ्यैरभिमतोगुणैः॥यथा॥क्षुद्राः संत्रासमेते विजहत हरयोभिन्नशक्रेभकुंभायुष्मद्गात्रेषुलज्जान्दधतिपरममीसायकाःनिष्पतन्तः सौमित्रेतिष्ठपात्रंत्वमसिनहिरुषांनन्वहंमेघनादः किंचिद्भ्रूभङ्गलीलानियमितजलधिंराममन्वेषयामि भयानकोभवेद्भीतिप्रकृतिर्घोरवस्तुनः सचप्रायेणवनितानीचबालेषुदृश्यते दिगालोकास्यशोषाङ्गकम्पगद्गदसंभ्रमाः स्तंभवैवर्ण्यमोहाश्चवर्ण्यन्तेविबुधैरिह॥यथा॥ग्रीवाभङ्गाभिरामंमुहुरनुपततिस्यन्दनेदत्तदृष्टिः पश्चार्द्धेनप्रविष्टः शरपतनभयाद्भूयसापूर्वकायम् शष्पैरर्द्धावलीढैः श्रमविवृ

31

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तमुखभ्रंसिभिः कीर्णवर्त्मायस्योदग्रप्लुतत्वाद्वियतिबहुतरंस्तोकमुर्व्यांप्रयाति बीभत्सः स्याज्जुगुप्सातः सोहृद्य श्रवणेक्षणात् निष्ठीवनास्यभं
गादिस्यादत्रमहतांनच॥यथा॥उत्कृत्योत्कृत्यकृत्तिंप्रथममथपृथूत्सेधभूयांसिमांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि
जग्ध्वा आर्त्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्कादङ्कस्थादस्थिसंस्थापुटकगतमपिक्रव्य मव्यग्रमत्ति विस्मयात्माद्भुतोज्ञेयः
सचासंभाव्यवस्तुनः दर्शनाच्छ्रवणाद्वापिप्राणिनामुपजायते तत्रनेत्रविकारः स्यात्पुलकः स्वेदएवच निस्पन्दनेत्रतासाधुसाधुवादास्तथाम
ताः चित्रेकनकलतायांशरदिन्दुस्तत्रखंजनद्वितयंतत्रचमनोजधनुर्णीतदुपरिगाढांधकाराणि सम्यज्ञानसमुत्थानः शान्तोनिस्पृहनाय
कः रागद्वेषपरित्यागेसम्यग्ज्ञानस्यचोद्भवः पश्चात्तापः शरीरादियावद्वस्तुविडंवनम् विवेकचित्तस्थैर्यादियोगाद्या स्तस्यलक्षणं॥यथा॥अ
हैवाहारेवाकुसुमशयनेवादृषदिवामणौवालोष्टेवाबलवतिरिपौवासुहृदिवा तृणेवास्त्रैणेवाममसमदृशोयांतुदिवसाः कचित्पुण्यारण्ये
शिवशिवशिवेतिप्रलपतः स्त्रैणंस्त्रीसमूहः अत्राहिरिवहारोहेयोनतुहारवदहिरप्युपादेयइतिवोद्धव्यम् अत्रसर्वत्रतत्तद्रसत्वमात्रेउदाह
रणमितिस्मर्तव्यम् इदानींरसानामविरोधविरोधावाह शृङ्गारहास्यौकरुणवीभत्सौवीररौद्रकौ भयानकाद्भुतोमिथ्नेमिथः शान्तोनकस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चित् शान्तेकरुणबीभत्सेनकिंचिद्दृष्टिश्चाद्भुतः शृंगारेशांतकरुणौहास्यस्यकरुणोरिपुः अत्रकरुणबीभत्सयोर्मैत्रीविशेषाभिप्रायेणस्मर्तव्यम्॥
स्थायीभावोरसइत्युक्तमतआह रतिर्हासश्चशोकश्चक्रोधोत्साहौभयंतथा जुगुप्साविस्मयोभावानिर्वेदः स्थापिनोनव स्थायिनोभावानवेत्यर्थः
ननुनिर्वेदस्यकथंशान्तरसस्थायिताव्यभिचारित्वादितिचेन्न अधिकरणभेदेनोभयाविरोधादित्यन्यत्रविस्तरः स्थायिलक्षणंतु विरुद्धैरविरुद्धै
र्वाभावैर्विच्छिद्यतेनयः स्वात्मभावेनयत्यन्यान्स्थायीभावः सउच्यते यथालवणाकरः विरुद्धैर्जुगुप्सादिभिरविरुद्धैरित्यादिभिर्योनविच्छिद्यते
॥विशेषलक्षण न्तु॥मनोनुकूलविषयसुखात्मकंसंवेदनंरतिः अङ्गक्रीडादिभिश्चेतोविकारोहासः इष्टनाशादिजनितंचित्तवैक्लव्यंशोकः प्र
तिकूलेषुतैक्ष्ण्यप्ररोहः क्रोधः कार्यारंभेस्थिरसंरंभउत्साहः व्याघ्रादिदर्शनादिजनितंमनः क्लैव्यम्भयम् दोषदर्शनात्पदार्थेगर्हणंजुगुप्सा लो
कसीमातिक्रान्तपदार्थविषयश्चित्तविकारोविस्मयः तत्वज्ञानादीर्ष्यादिभिः स्वावमाननंनिर्वेदः एतेचसर्वभावेषुमुख्याः यदाह॥यथानराणां
नृपतिः शिष्याणांचयथागुरुः तथासर्वेषुभावेषुस्थायीभावः स्मृतोमहान् विभावोद्विविधः उद्दीपनआलंबनश्च तत्रकोकिलवसन्तादिरुद्दीप
नः नायिकादिरालंबनः योगादपि अस्माकंमतेरतित्वादिकमनुभावत्वादिकंजातिरेव नहिवैशेषिकादिवदस्मत्प्रक्रियेति॥अनुभावलक्षण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न्तु॥अनुभावोविकारस्तुभावसंसूचनात्मकः॥तत्र॥हेलाविछित्तिविब्बोककिलकिंचितविभ्रमाः लीलाविलासोहावश्चविक्षेपोविकृतोमदः

मोट्टायितंकुट्टमितंमौग्ध्यश्चतपनंतथा ललितंचेत्यमीहावाश्चेष्टाः शृङ्गारभावजाः एतच्चास्माभिरेवप्रपंचितमन्यत्र॥सात्विकलक्षन्तु॥
विशेषेणाभितः कायेस्थायिनंभावयन्तिये अनुभूतादिहेतून्स्तान्वदन्तिव्यभिचारिणः आदिपदात्स्वेदादिपरिग्रहः तेचनिर्वेदग्लानिशं
कास्यास्तथासूयामदश्रमाः आलस्यंचैवदैन्यंच चिंतामोहस्मृतिर्धृतिः व्रीडाचपलताहर्षश्चावेगोजडतातथा गर्वोविषादऔत्सुक्यंनिद्राप
स्मारएवच सुप्तंविरोधोमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथामरणमेवच त्रासश्चैववितर्कश्चविज्ञेयाव्यभिचारिणः अमी
चप्रत्येकंभाव्यंतेक्वचित्सर्वभावतापि यथाक्वाकार्यंशशलक्ष्मणइत्यादौ अत्रक्वाकार्यमितिवितर्कः भूयोपिदृश्येतसेत्यौत्सुक्यम् दोषाणा
मितिमतिः कोपेऽपीतिस्मृतिः किंवक्ष्यंतीतिशंकास्वप्नेपिसादुर्लभेतिदैन्यम् चेतःस्वास्थ्यमुपैहीतिधृतिः कःखल्वित्यादिचिन्ता॥इत्यलंका
रशेखरेरसमरीचिः॥परेरसदोषाभावानुकूलवर्णादयः काव्यशरीरेमनइत्युक्तमतोरसदोषानिदानीमाह॥स्वस्वशब्दैरुपादानंभावस्यचरस
स्यच कष्टप्रकल्पनीयत्वःमनुभावविभावयोः प्रकृतेरसवैरित्वन्तेषांव्यक्तिविपर्ययः अनौचितीचसर्वत्ररसेदोषाःस्युरीदृशाः सामान्यतो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विशेषतोवास्वस्ववाचकशब्दप्रतिपादकानांनिर्वेदादीनांरत्यादीनांवारसाननुगुणत्वमितिसकलानुभवसिद्धं॥तत्रव्यभिचारिणःस्वस्वशब्दोपा
दानम् यथा॥सव्रीडादयिताननेसकरुणामातङ्गचर्म्माम्बरेसत्रासाभुजगेसविस्मयरसाचन्द्रेऽमृतस्यन्दिनि सेर्ष्याजह्नुसुतावलोकनविधौदीना
कपालोदरेपार्वत्यानवसंगमप्रणयिनीदृष्टिः शिवायास्तुवः सव्रीडानयननिपातनात् अत्रव्रीडादीनांस्वस्वभावप्रतिपादितानांचमत्कारज
नकत्वस्यसहृदयसाक्षिकतयातदभावेरसभंगइत्युचितम् एतदेवप्रत्युदाहरणंप्रतिपादयन्ति व्यानम्रादयितानने मुकुलितामातङ्गचर्म्मा
म्बरेसोत्कम्पाभुजगेनिमेषरहिताचन्द्रेऽमृतस्यन्दिनि मीलद्भ्रूःसुरसिन्धुदर्शनविधौम्लानाकपालोदरइत्यादि॥स्थायिनोयथा॥संप्रहारैः प्र
हरणैःसप्रहाराणांपरस्परम् झणत्कारैःश्रुतिगतैरुत्साहस्तस्यकोऽप्यभूत् संप्रहारःसंग्रामःअत्रोत्साहस्यरसस्यरसशब्दस्यप्रतिपादित
स्यरसाजनकत्वम् यथा॥तामनङ्गजयमंगलश्रियंकिंचिदुच्चभुजमूलशोभिनीम् नेत्रयोःकृतवतोऽस्यगोचरेकोऽप्यजायतरसोनिरन्तरःशृ
ङ्गाररोदितप्रतिपादितस्ययथा॥आलोक्यकोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्तिम् पश्यैषबाल्यमतिवृत्त्यविवर्तमा
नश्शृङ्गारसीमनितरङ्गितमातनोति॥अनुभावस्यकष्टकल्पनीयत्वंयथा॥कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डलेशिशिररोचिषितस्ययू

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०श्री० नः लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिर्व्यक्तस्तनोन्नतिरभून्नयनावनौसा अत्रचन्द्रोदयउद्दीपनविभावाः शृङ्गारयोग्यानुभावप्रतीत्या स्वा
३३ दनापर्यवसायिनः स्थिताः यद्यप्यंशुकनिवेशोऽनुभावत्वयोग्यस्तथापितस्यनव्यक्तिप्रयोजकत्वेनोपादानादनुभावत्वापर्य्यवसानम्॥ य
द्वा॥पुन्निष्ठएवशृङ्गारः प्रतिपिपादयिषतः अभून्नयनावनौसेत्यनेनतस्यैवालम्बनत्वप्रतिपादनात् नचपुंसिकश्चिदनुभावउपात्तः नच
विभावैराक्षेपार्हइतिकष्टेनकल्पनीयः॥विभावस्ययथा॥ परिहरतिरतिंमतिंलुनीतेस्खलतितरांपरिवर्ततेचभूयः इतिवतविषमादशास्य
देहंपरिभवतिप्रसभंकिमत्रकुर्मः इत्यनेनप्रकारेणास्यदशादेहंपरिभवतिइत्यन्वयः अत्ररतिपरिहारादीनामनुभावानांकरुणादावपि
संभावनात्कामिनीरूपोविभावोप्यत्रप्रतिपाद्यः प्रकरणादिसापेक्षत्वात्॥प्रकृतरसविरोधिविषयकोविभावादिः॥ तत्रविभावव्यभिचा
रिणामुदाहरणम्॥यथा॥ प्रसादेवर्त्तस्वप्रकटयमुदंसंत्यजरुषंप्रियेशुष्यन्त्यंगान्यमृतमिवतेसिञ्चतुवचः निधानंसौख्यानांक्षणमभिमुखं
स्थापयमुखंनमुग्धेप्रत्येतुंप्रभवतिगतः कालहरिणः अत्रशृङ्गारेप्रतिकूलस्यशान्तस्यानित्यताप्रकाशनरूपोनुभावः तत्रप्रकाशितोनिर्वेदस्य
व्यभिचार्य्युक्तियुक्तेः शान्तेनिर्वेदस्यस्थायित्वात्॥व्यक्तिविपर्ययइतिपद्यलैःयद्वर्णनमनुचितंचेति॥ तत्रतद्वर्णनम्॥व्यक्तयोदिव्याः अदिव्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दिव्यादिव्याश्च तत्रदिव्यत्वममर्त्यैकरूपकतायथा॥शिवादेः शेषादेः अदिव्यत्वंयथामाधवादेः दिव्यादिव्यत्वंश्रीकृष्णादेः त्रिविधाअप्येताश्चतु
र्विधाभवंति वीररौद्रशृंगारशांतरसप्रधानाः धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्ताः यथा॥रामभार्गवश्रीकृष्णजीमूतवाहनाः अेतेचोत्त
ममध्यमाधमभेदाद्बहवोभवन्तितत्रस्वः पातालगमनसमुद्राद्युल्लङ्घनपर्वतस्फोटनाद्युत्साहोदिव्येष्वेववर्णनीयः अदिव्येषुतुयावद्देवलो
कप्रसिद्धमुचितंतावदेववर्णनीयम् अनौचितेचमहान्सदोषः सचभवानीशंकरादीनांपित्रोर्वाकेलिवर्णनम् अस्पुक्तिर्वीनभः साम्यस्त
नादावित्यनौचिती इत्यनेनाऽस्तिवर्णनम् यद्यपिकुमारसम्भवेकालिदासेनवर्णितम् तथाप्यर्वाचीनैर्नकर्तव्यम् नहिगजादीनामुदर्य्ये
न्नेजोवटकाष्ठमश्नितंपचतीत्यस्मदादीनामुदर्य्येणतेजसातथाभवितव्यमितिन्यायात् तस्यापिदोषत्वाद्वादोषान्वक्तुम्वदन्ति दोषोव्य
क्तिविवेकेऽमुकविलोकविलोचने काव्यमीमांसिकप्राप्तमहिमामहिमाहतः॥यदाहमहिमा॥अनौचित्यादृतेनान्यद्रसभंगस्यकारण
म् प्रसिद्धौचित्यमूलाहिरसस्योपनिषत्परा इदृशाद्इत्यनेनान्येनौचित्यहेतवोदोषाभवन्तीतिदर्शितम्॥यथा॥नायिकायामानादिनाच
रणप्रहारादिनावानायकस्यात्यन्तिककोपादिवर्णनम् व्यक्तिविपर्ययानौचित्ययोरवान्तरभेदविवक्षयाभेदः अमीषांक्वचिद्दोष

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तापि यत्रनरसहानिर्भवतितद्यथासहृदयैरेवपर्य्यालोचनीयमिति ग्रंथगौरवभयान्नेहतन्यतइति॥इतिश्रीमाणिक्यचन्द्रविरचितेलंका
रशेखरेरसदोषमरीचिः॥उद्दामावीररौद्राद्दौछंदोरीत्यात्वरादयः हृद्याः शृङ्गारहास्यादौपरयोर्मध्यमागतिः इदानीमनुकूलान्वर्णनीयाना
ह रौद्रादाविक्त्यादिपदेनभयानकस्यहासादाविक्त्यनेककरुणस्यपरिग्रहः परयोर्वीभत्साद्भुतयोः शान्तस्यनियमोनास्तीतिहृदयम्॥उद्दामेतिच्छ
न्दः दंडकहंसीस्रग्धरादिरीतिर्गौडी अक्षरेषुश्रीपादः उद्दामाः स्वान्तरालेनसजातीयेतरेणच योगाद्याश्चैवचत्वारः शेषाविकटगुम्फना हृद्या
उपेन्द्रादिछंदइहरीतिर्वैदर्भीअक्षरेषुपुनः स्तुरावं नसौचलध्वन्तरीतौनश्चोपर्य्यनुनासिकः असमासोथ सोल्पोवाहृद्यंस्यात्संधिसौख्यव
त॥यथा॥अनङ्ग-रङ्ग-प्रतिमंयदङ्ग-भङ्गीभिरङ्गीकृतमानताङ्ग्याकुर्वंतिपूनांसहसायथैतास्वान्तानिशान्तापरचिन्तितानि अत्रवैपरीत्यंदोषा
येतिमनसिकृत्वाक्वचिद्दोषतामाह वक्तृवाच्यप्रबन्धानामौचित्येनक्वचित्क्वचित् रचनावृत्तिवर्णानामन्यथात्वमपीष्यते॥यथा॥मन्थायस्ता
र्णवाम्भः स्थितकुहरचलन्मन्दरध्वानधीरः कोणाघातेषुगर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः कृष्णाक्रोधाग्रदूतः कुरुशतनिधनोत्पातनि
र्घातवातः केनास्मत्सिंहनादप्रतिरसितसुखोदुंदुभिस्ताडितोयम् भेरीशतसहस्राणिढक्काशतशतानिचएकदायत्रहन्यन्तेकोणाघातः सउ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

च्यतेअत्रहिवाच्यमुद्दामंप्रबंधत्वात् प्रबंधश्चाभिनेयत्वान्नतथा किन्तुवक्ताभीमसेनइति तदौचित्यादुद्दामावर्णादयः क्वचिद्वाच्यौचित्यात्
यथा शंकुव्याकीर्णरङ्कुद्रुतनिशितशरक्षुण्णदीव्यत्तरक्षुज्याघोषंक्षुब्धकण्ठीरवरवचकितव्यस्तमातंगयूथम् खड्गव्यालूनखड्गंतुमुलकल
कलप्रान्तकूजच्छकुन्तंभल्लध्वस्ताच्छभल्लंवनभुविमृगयाकर्मतेनप्रतेने अत्रहिवाच्यस्यसर्वप्राणिविप्लवात्मकमृगययाएवतथात्वात्त
त्वम् क्वचित्प्रबंधौचित्यात्॥यथा॥कादम्बर्य्यादौशृङ्गारेपिनमसृणावर्णाइतिदिक्॥सर्वसाधारणंदोषमाह॥गृहीतमुक्तकोनेष्टोहरचाणा
नशेषता मात्राभेदोप्यतः श्लाघ्यः पदोप्येषशुभावहः एकस्यपदस्यशेषेयोवर्णः सोपरस्याद्येनदीयते यथा॥नाककलाहकाररेफचकारा
णांसुतराम्॥यथा॥प्रवाहहरितादूर्वाविवाहरसितंतथा स्फूर्जत्काचचयाभूमिर्भूयः पुण्यैरवाप्यते मात्राभेदेपिस्वल्पोदोष नाककादम्वि
35 नी पदेत्वेणनदोषः किन्तुगुणः॥यथा॥वन्दामहेमहेशानइत्यादौ अन्यदप्याह रलयोश्चचवर्णस्यशैथिल्यायैवभूरितारेफलकारचवर्ग
णांभूयस्त्वंशैथिल्यहेतुतयारसहानिकरमित्यर्थः॥संधौवर्णदोषमाह॥रसहास्तादतिहृद्येनमशरहा हाहकारश्चकछचतयशराशकका
रादधरादौपायभूयसंयोगः तात्तकारात् कात्ककारात् अधराअधोवर्त्तिनः अतिहृद्ययोः शृंगारहास्ययोः रसयोर्दोषायभवन्ति शब्द

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दोषकष्टस्यान्वयबोधविरोधिता अस्यतुतस्मिन्नपिरसहानिरितिविशेषः अनैकान्तिकवाधयोरिवानुमितौ ऐतद्भिन्नेतदितिरहस्यम् भू
यसांवर्णानांयोगः कात्स्न्यादिपदे श्रुतिमेवान्यथाकारमस्त्राणिक्षियन्त्यपि काव्यालंकारविद्याभ्यांशोद्धोदनिरसूत्रयत् उपक्रमोदोषगुणा
वलंकारोऽथवर्णकः संप्रदायःकवेस्तस्यसामर्थ्यमप्यविभ्रमः अष्टौरत्नानिदीप्तानिसंत्यलंकारशेखरे चत्वारःस्युरलंकारेसंप्रदायमरीच
स्त्र मः
यः सामर्थ्येद्वौपरस्मिंस्तुपंचकेस्युरत्नयः मामकीनांकृतिमिमांदूषतोदूषयन्तिये काव्यवार्तांनजानन्तितेनूनंपांशुलाः स्मृताः आस्तेयद्यपि
पूर्वपण्डितकृतव्याख्यैवसंख्यावतामानन्दायतथापिकेशवकवेर्वाचामियंगुम्फना व्याख्यासौष्टवशब्दलाघवमिथः सबन्धपूर्वापरप्रत्य
र्थप्रतिबंधनिर्मलगुणाः कुत्राप्यतोलभ्यताम् तर्कप्रौढमतिः प्रशस्तकवितावल्लीवसन्तोत्सवः कोप्यव्याकरणप्रपंचचतुरोऽलङ्कारपा
रङ्गमः॥ श्रीमत्केशवमिश्रमद्भुतगुणावासंनियुज्यस्वयंचक्रेशक्रसमप्रवन्धममलंमाणिक्यचन्द्रोनृपः॥ इतिश्रीमन्महाराजमाणिक्यचन्द्र
कारितेकेशवमिश्रकृतेऽलंकारशेखरेविभ्रामरत्नम्॥ शास्त्र्यागोकुलचन्द्रस्यश्रीमन्नालालशर्मणा॥ यन्त्रान्मुद्रामयंप्रापिशिलावर्णैःसुशोधितैः
श्रीमद्विजवरकमलदिवाकरेणगणेशशर्मणाशोधितोयमूमानमंदिरसन्निधौवाराणसीसंस्कृतयन्त्रालयेऽलंकारशेखराख्योऽयंग्रन्थोमुद्रितःसंवत्१९२३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अलंकारशेखरसूचीप्रारभ्यते १

प्रकरणं	पत्र	पङ्क्ति
मङ्गलाचरणं	१	१
ग्रंथकरणप्रतिज्ञा	१	२
कविवंशवर्णनं	१	४
सुजनप्रशंसादुर्जननिंदा	२	५
काव्यलक्षणावतरणं	२	७
काव्यलक्षणं	२	८
लक्षणांतरम्	२	९
काव्यप्रकाशकारलक्षणं	२	१
लक्षणांतरं	२	२
तत्खंडनं	२	४
मतांतरेणलक्षणं	२	५
काव्यप्रयोजनम्	२	६
सरस्वतीकंठाभरणोक्तलक्षणं	२	७
प्रवृत्त्यौपयिकंफलम्	२	८
प्रयोजनांतराणि	३	३
कारणवर्णनम्	३	४
भाषाविभागः	३	२
गद्यलक्षणं	३	४
काव्यादर्शमतेनविभागः	३	५
प्रथममरीचिः	३	८
काव्यस्वरूपांतरम्	३	८
रीतिलक्षणं	४	२
उक्तिविभागः	४	९
मुद्राविभागः	४	६
वृत्तिविभागः	५	७
शक्तिलक्षणं	५	८
लक्षणालक्षणं	५	९
व्यंजनालक्षणं	५	१
शक्यार्थव्यंजकता	६	४
लक्ष्यार्थस्यव्यंजकता	६	५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकरणं	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति
व्यंग्यार्थस्यव्यंजकता	६	८	व्यर्थं	७	७	व्याकीर्ण	८	४
उत्तमकाव्यलक्षणं	६	९	अश्लील	७	८	समाप्तपुनरात्तं	८	६
मध्यमकाव्यलक्षणं	६	१	तद्भेदाः	७	८	भग्नक्रमं	८	८
अधमकाव्यलक्षणं	६	३	अप्रयुक्त	७	१	भग्नयति	८	९
द्वितीयमरीचिः	६	९	असाधु	७	२	भग्नछंदः	८	१
दोषसामान्यलक्षणं	७	२	अवाचक	७	३	वाक्यगर्भ	८	२
पददोषा	७	३	तृतीयमरीचिः	७	५	अरीतिमत्	८	३
कष्टं	७	४	वाक्यदोषाः	७	६	अविमृष्टविधेयांशं	८	५
अप्रयुक्तं	७	५	न्यून	७	७	समुदायार्थवर्जित	८	७
संदिग्धं	७	६	विसंधिः	८	१	विरुद्धमतिकृत	८	८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति
असमर्थसमासं	९	१	देशादिविरोधि	९	३	समाधि	१०	२
चतुर्थमरीचिः	९	२	पंचममरीचि	१०	२	षष्ठमरीचिः	१०	४
अर्थदोषाः	९	३	अथगुणाः	१०	२	अर्थगुणाः	१०	५
विरसं	९	३	गुणविभागः	१०	४	तद्विभागः	१०	५
ग्राम्यं	९	५	शब्दगुणा	१०	४	भाविकत्वं	१०	६
व्याहत	९	६	तद्विभागः	१०	५	सुशब्दता	१०	९
खिन्नं	९	७	संक्षेपः	१०	६	पर्यायोक्तिः	११	२
हीनोपमं	९	९	उदात्तत्व	१०	७	सुधर्मिता	११	३
अधिकोपमं	९	१	प्रसादत्वं	१०	९	अर्थगुणमरीचिः	११	५
असदृशोपमं	९	२	उक्तिः	१०	१	वैशेषिकगुणा	११	६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति
कष्टस्यादोषता	११	१	यतिभङ्ग-स्यादोषत्वं	१२	१	अनुप्रासलक्षणं	१३	६
संदिग्धस्यादोषता	११	३	विरुद्धस्यादोषता	१२	३	गूढलक्षणं	१३	९
अर्थस्यादोषता	११	४	विरसस्यादोषता	१२	४	श्लेषलक्षणं	१३	१
अश्लीलस्यादोषता	११	५	अर्थस्यादोषता	१२	६	प्रहेलिकालक्षणं	१३	३
अप्रतीतस्यादोषता	११	७	वैशेषिकगुणमरीचिः	१२	८	प्रश्नोत्तरलक्षणं	१३	५
अवाचकस्यादोषत्वं	१२	१	अलंकारसामान्यलक्षणं	१२	९	यमकलक्षणं	१३	७
न्यूनस्यादोषत्वं	१२	२	तद्विशेषलक्षणं	१३	१	शब्दालंकारमरीचिः	१३	९
विसंध्यदोषत्वं	१२	३	शब्दालंकारविभागः	१३	१	अर्थालंकारविभागः	१३	९
व्याकीर्णस्यादोषत्वं	१२	८	चित्रलक्षणं	१३	२	उपमालक्षणं	१४	१
समाप्तपुनरात्तस्यादोषत्वं	१२	९	वक्रोक्तिलक्षणं	१३	४	तद्विभाग	१४	२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति
नीलस्य…………	२६	५	साम्यं…………	२७	३	रसंविनाकाव्यस्यनि			वरांगनालक्षणं….	२९	५
शोणस्य…………	२६	७	धर्मिधर्मवाचकं…	२७	४	ष्प्रयोजनत्वप्रतिपादनं	२९	३	एतद्विभागः…….	२९	६
पीतस्य…………	२६	८	चित्राद्युपकारकमरीचिः	२७	६	रसलक्षणम्…….	२९	४	नायकलक्षणम्….	२९	८
धूसरस्य…………	२६	९	समस्यापूरणादिक	२७	६	तद्विभागः………	२९	७	तद्विभागः………	२९	९
हरितस्य…………	२६	१	प्रश्नोत्तरं………	२७	८	शृंगारविभागः…..	२९	८	अनुकूललक्षणं….	२९	९
शुक्लादिनियममरीचिः	२६	२	पदसमस्या…….	२७	९	संभोगलक्षणं……	२९	९	दक्षिणलक्षणम्….	३०	१
एकाद्यासहस्रनियमः	२६	२	पूर्वस्मिन्नाद्ययोजनं	२८	१	नायिकाविभागः….	२९	३	शठलक्षणम्…….	३०	१
संख्यानियममरीचिः…	२७	४	प्रकारांतरं………	२८	२	अनूढालक्षणं……	२९	४	धृष्टलक्षणम्…….	३०	१
कविप्रकर्षबीजवर्णनम्	२७	४	कविसामर्थ्यरत्नं…	२९	३	स्वकीयालक्षणम्…	२९	४	विप्रलंभलक्षणं….	३०	२
गतागतं…………	२७	५	रसनिरूपणम्…..	२९	३	परकीयालक्षणम्….	२९	४	तद्विभागः………	३०	३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

38

प्रकरणं	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति
प्रतापोपमानानि ·······	२२	२	समानाद्यैर्निभादिभिश्च	२२	९	तद्विभागः ·········	२३	८	पुरस्य ··········	२५	१
कीर्त्युपमानानि ·······	२२	२	वंध्याद्यैः ··········	२३	१	असन्निवंधनं ······	२४	२	सरितः ··········	२५	१
करवर्णनं ··········	२२	२	चोराद्यैः ···········	२३	२	सतोप्यनिबन्धनं ····	२४	३	सरसः ·········	२५	१
पादवर्णनं ··········	२२	३	अर्याद्यैः ···········	२३	३	नियमनिर्वाहः ·····	२४	४	अब्धेः ··········	२५	२
गमनोपमाने ········	२२	३	वंशाद्यैः ···········	२३	४	नियममरीचिः·····	२४	४	अरण्ये ··········	२५	२
भुजयोः कार्कश्यवर्णनं··	२२	३	प्रकारांतरं ·········	२३	६	वर्णनीयवस्तु ·····	२४	६	एवमुद्यानादिवर्णनं··	२५	२
पुरुषवर्णनमरीचि·····	२२	६	वर्णकरत्नं·········	२३	७	नृपवर्णनं ········	२४	७	वर्णनीयमरीचिः····	२६	२
सादृश्यप्रकारकाः ·····	२२	७	संप्रदायस्यसर्वापेक्षया			देवीवर्णनं ········	२४	८	श्वेतादिनियमः ····	२६	३
इवादिशब्दैस्सादृश्यं···	२२	७	भ्यर्हितत्वप्रतिपादन			देशस्य ··········	२४	९	शोणस्य ·········	२६	३
प्रतिमानाद्यैश्च ·······	२२	८	म् ···············	२३	७	ग्रामस्य··········	२४	९	धूसरस्य ·········	२६	३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति
केशोपमानानि ·····	१७	७	बाह्वोः ··········	१९	३	ऊर्वोः ············	२०	६	धम्मिल्लस्य ·······	२१	८
ललाटोपमानानि ···	१८	५	करस्य ··········	१९	५	चरणस्य ··········	२०	७	सीमंतस्य ·········	२१	८
भ्रूपमानानि ·······	१८	७	नखानां ········	१९	६	अंगुष्ठनखयोः ·····	२०	९	जिह्वाचलस्य ·······	२१	९
नासोपमानानि ·····	१८	२	स्तनस्य ········	१९	८	गमनस्य ··········	२१	१	वपुर्गुणाः ········	२१	२
कण्ठस्य ···········	१८	५	रोमाल्याः ········	२०	४	कटाक्षस्य ········	२१	२	योषिद्वर्णनमरीचिः	२१	८
नेत्रस्य ············	१९	५	नाभ्याः ··········	२०	५	हासस्य ··········	२१	३	पुरुषवर्णनं ······	२१	८
अधरोष्ठस्य ·······	१९	३	वल्याः ··········	२०	८	दर्शनस्य ········	२१	५	बाह्वोः ··········	२२	१
दंतानां ············	१९	७	मध्यस्य ·········	२०	१	श्वासस्य ··········	२१	६			
वाण्याः ···········	१९	९	जघनस्य ········	२०	२	नूपुरध्वनेः ······	२१	७	वक्षसः ··········	२२	३
बाह्माधुर्यस्य ······	१९	९	नितम्बस्य ········	२०	३	वेण्याः ·········	२१	८	हृदोरस्यंतस्वच्छतावर्णनं	२२	५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति	प्रकरण	पत्र	पङ्क्ति
वाक्यार्थोपमा ……	१४	३	उपमामरीचिः ……	१५	२	रूपकमरीचिः ……	१५	३	अन्यदेशत्वलक्षणं …	१६	२
अतिशयोपमा ……	१४	५	रूपकलक्षणं ……	१५	३	उत्प्रेक्षालक्षणं ……	१५	३	विशेषोक्तिलक्षणं ……	१६	६
श्लेषोपमा ……	१४	६	तद्विभागः ……	१५	४	समासोक्तिलक्षणं …	१५	६	विभावनालक्षणं ……	१६	७
निन्दोपमा ……	१४	७	विरुद्धरूपकम् ……	१५	४	अपह्नुतिलक्षणं …	१५	८	व्यतिरेकस्यैतेष्वनंतर्भावः	१७	१
अभूतोपमा ……	१४	९	समस्तं ……	१५	६	समाहितलक्षणं ……	१५	९	आक्षेपस्याप्यनंतर्भावः	१७	२
विपर्ययोपमा ……	१४	१	व्यस्तं ……	१५	६	स्वभावलक्षणं ……	१६	१	अलंकाररत्नं ……	१७	४
संशयोपमा ……	१४	२	रूपकरूपकम् ……	१५	७	विरोधविभागः ……	१६	२	सादृश्यप्रतियोग्यनुयो		
नियमोपमा ……	१४	४	श्लिष्टरूपकम् ……	१५	८	सारलक्षणं ……	१६	५	गिनौ ……	१७	५
स्तोपमा ……	१४	५	लक्षणायारूपकांतर्भावः	१५	९	दीपकलक्षणं ……	१६	६	योषिदुपमानानि	१७	६
विक्रियोपमा ……	१४	६	तद्विभागः ……	१५	१	सहोक्तिलक्षणं	१६	२	तत्तनूपमानानि	१७	३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

40

प्रकरणं	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति
अनौचितीदोष	३४	४	ग्रंथोपसंहारः	३५	२
अन्येनौचित्यहेतव	३४	८	इत्यलंकारशेखरसूची		
रसदोषमरीचिः	३४	१	समाप्ताः		
रसभेदेनगतिभेदः	३४	२			
क्वचिददोषता	३४	७			
वक्रौचित्यात्	३४	८			
वाच्यौचित्यात्	३५	१			
प्रबंधौचित्यात्	३५	४			
सर्वसाधारणदोषः	३५	४			
स घौवर्णदोषः	३५	८			

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकरणं	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति	प्रकरणं	पत्र	पङ्क्ति
पूर्वानुरागलक्षणं......	३०	३	तद्विभागः..........	३०	९	स्थायीलक्षणं.......	३२	३	रसदोषाः...........	३२	८
मानलक्षणं..........	३०	६	करुणालक्षणं.......	३१	१	विशेषालक्षणं.......	३२	५	व्यभिचारिणस्वशब्द		
प्रवासलक्षणं........	३०	७	रौद्रलक्षणम्.......	३१	३	विभावविभागः......	३२	८	वाच्यत्वं..........	३३	५
करुणलक्षणं........	३०	९	वीरलक्षणं.........	३१	५	उद्दीपनविभावः....	३२	९	स्थायिनः..........	३३	६
देवरति..............	३०	३	भयानकलक्षणं.....	३१	७	आलंबनलक्षणं.....	३२	९	रसस्य............	३३	६
मुनेः..............	३०	४	बीभत्सलक्षणं.......	३१	१	अनुभावः..........	३२	१	अनुभावस्यकष्टकल्प		
पुत्रस्य............	३०	५	अद्भुतलक्षणं........	३१	३	सात्विकलक्षणं......	३२	२	ना............	३३	९
नृपस्य............	३०	६	शांतलक्षणं.........	३१	५	व्यभिचारिभावलक्षणं	३२	३	विभावस्य.........	३३	४
गुरोः.............	३०	७	रसानांअविरोधविरोधौ	३१	९	तद्विभागः.........	३२	३	प्रतिकूलविभावग्रहः	३३	६
हासलक्षणम्........	३०	८	स्थायीभावविभागः...	३२	२	रसमरीतिः.........	३२	८	अक्तिविपर्ययः....	३३	९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ०नं०-३२ इत्यलङ्कारशेखरः समाप्तः पत्रै-३९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham